RNI No.21138/1970

तिरुमलतिरुपतिदेवस्थानानि

सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:13 Issue: 05
August 2026, Price Rs.20/-
No. of pages-24

August 2026

Rs.20/-





तिरुमलस्थ
श्रीवेङ्कटेश्वरस्वामिनः वार्षिक ब्रह्मोत्सवाः

14-09-2026 आरभ्य 23.09.2026 पर्यन्तम्

दिनाङ्क	वासरः	प्रातः उत्सवः	रात्रौ उत्सवः
14-09-2026	इन्दुवासरः	---	अङ्कुरार्पणम्
15-09-2026	भौम्यवासरः	तिरुच्चि उत्सवः ध्वजारोहणम्	महाशेषवाहनम्
16-09-2026	सौम्यवासरः	लघुशेषवाहनम्	हंसवाहनम्
17-09-2026	बृहस्पतिवासरः	सिंहवाहनम्	मौक्तिकवाहनम्
18-09-2026	भृगुवासरः	कल्पवृक्षवाहनम्	सर्वभूपालवाहनम्
19-09-2026	मन्दवासरः	आन्दोलिकायां मोहिन्यवतारोत्सवः	गरुडवाहनम्
20-09-2026	भानुवासरः	हनुमद्वाहनम्, सायं - वसन्तोत्सवः	गजवाहनम्
21-09-2026	इन्दुवासरः	सूर्यप्रभावाहनम्	चन्द्रप्रभावाहनम्
22-09-2026	भौम्यवासरः	रथोत्सवः	अश्ववाहनम्
23-09-2026	सौम्यवासरः	चक्रस्नानम्	ध्वजावरोहणम्



गीतामृतम्

श्रीभगवानुवाच -

यज्ञात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्मकौन्तेय! मुक्तसङ्गस्समाचर।।

सहयज्ञाः प्रजास्सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।।

(भगवद्गीता ३.९,१०.)

९. भावः - हे कौन्तेय! यज्ञार्थं भगवत्प्रीतिकरकर्मभ्यः अन्यकाम्यकर्माणि जनः आचरन् कर्मबद्धो भवति। अर्थात् काम्यकर्माणि बन्धहेतुभूतानि भवन्ति। अतः भगवत्प्रीत्यर्थकर्माणि निरपेक्षः फलापेक्षारहितः समाचर।

विशेषांशः - कर्म सद्वा असत् फलं वा ददाति। तत्कर्मफलं परलोके अनुभोक्तव्यम्। तथा नो चेत् जन्मान्तरप्राप्तिरस्यात्। अतः यत्कर्मापि न कर्तव्यमिति केचिद्वदन्ति। तद्विधानं शास्त्रज्ञानरहितमौढयमिति भगवानुपदिशति। फलासक्त्या क्रियमानमेव कर्म बन्धं जनयति। अन्यप्राणिहितार्थं वा परमेश्वरप्रीत्यर्थं वा फलासक्तिरहिततया क्रियमानकर्मद्वारा बन्धः नजायते। अपि च आत्मशुद्धिं जनयित्वा मोक्षार्हतां ददाति। परन्तु स्वब्रह्मनिष्ठाप्रतिबन्धरहितकर्माण्येव कर्तव्यानि। सदा ब्रह्म निष्ठायां स्थातव्यम्। करणयुतसंस्कारेभ्यः वासनानाशः भवितव्यः।

१०. भावः - सृष्टिकाले ब्रह्मा प्रजाः यज्ञसहितैः सृष्ट्वा एभिः यज्ञैः अभिवृद्धिं प्राप्नुवन्तु, अयं यज्ञः युष्माकं कामधेनुरिव इष्टार्थं दास्यतु इति आशीर्ददौ।

विशेषांशः - यज्ञो नाम ईश्वराराधनं, अन्यप्राणिभ्यः उपकारः, आत्मज्ञानमिति ज्ञातव्यम्।

सङ्कीर्तनम्

एवं दर्शयति बाढमतीव
केवलं ते प्रियसखि। तुलसि



घटितमृगमदमृत्तिकास्थासक
पटुशरीरे ते प्रबलयति
कुटिलतद्धनभारकुचविलग्नं वा
पिटरस्थले मृत्तिकातुलसि
ललितनवधर्मलीलाविलसनो
ज्वलनं तव तनुं संच्छादयति
जलविमलकेलिवशा सततं
आलीकधर्माञ्चितविहारा तुलसि।
सरसनखचन्द्रलेखास्ते सदा
परमलावण्यं पालयन्ति
तिरुवेङ्कटेश तत्करुणागुणिना
वररूपनवचन्द्रवदनातुलसि।

(अन्नमाचार्य आध्यात्मिक सङ्कीर्तनम् - ४३)

भगवत्सृष्टौमधुरातिमधुरः स्नेहः एव

यस्य दर्शनात् यस्य स्पर्शात् यस्य वचोश्रवणात् यस्य मनः द्रवीभवति सः स्नेहः इति श्रमद्रामायणवचनम्। किष्किन्धाकाण्डे स्नेहसम्बन्धमहोन्नतविषयाः आविष्कृताः। हनुमान् रामलक्ष्मणौ सुग्रीवसकाशमानीय तयोः सुग्रीवपरिचयञ्चकार। स्वसोदरभयेन कालं यापयन् सुग्रीवः रामलक्ष्मण मैत्रीलाभात् सन्तुष्टः आसीत्। राम! मया तव स्नेहः अङ्गीकृतश्चेत् मम हस्तमिमं ददामि। त्वमपि मम हस्तेन मेलय। अद्य शाश्वतबन्धः भवेदित्यवोचत्। श्रीरामोऽपि महतासन्तोषेण तेन हस्तसम्मेलनं चकार। हनुमता स्वयमग्निप्रतिष्ठापनात् अग्निसाक्षित्वेन रामसुग्रीवमैत्रीप्रतिज्ञाकरणमत्र विशेषः। सुग्रीवः त्वं मम स्नेहवान् जातोऽसि। इत परं सुखं वा दुःखं आवां द्वौ एकः एव इत्यवोचत्। उभौ परस्परक्लेशानुक्तवन्तौ। रामःसीतावियोगबाधामाविश्चकार। सुग्रीवः'' अस्मत्स्नेहं पुरस्कृत्य, तव हितं वदामि न त्वयं उपदेशः। अस्मन्मैत्रीमाननायैव तव शोकं मुमुश्च इत्यवोचत्। सहानुभूत्या हितवाक्यानि वदन्तौ द्वौ सखायौ अत्र पश्यामः।

वालिः रामशराघातात् भूमावपतत्। यद्यपि वालिवधं सुग्रीवाकांक्षितं तथापि वधे सम्पन्ने सुग्रीवे अपराधभावना सञ्जाता। रामाय स्वदुःखं निवेदयामास। स्वसोदरमरणकारणभूतः अहं अग्निप्रवेशं करिष्यामीत्यवोचत्। तच्छृत्वा सामान्यस्तु अस्मिन् विषये किंवक्तव्यताविमूढः स्यात्, परन्तु रामः तस्य मानसिकस्थितिं सम्यक् ज्ञात्वा स्वच्छस्नेही श्रीरामः प्रत्युक्तमनुक्त्वैव अश्रुधारया विमनस्कः आसीत्। अत्र मित्रे रामे सहनशीलता अवधार्या। लोके बहवः स्नेहशीलाः बहुषु सन्दर्भेषु ''मम बाधां जानीहि मम बाधां जानीहि इति वदन्तः एव परस्परहृदयं न जानन्ति। यदि परस्परहृदयज्ञौ समयोचिततया सहनशीलता द्वाभ्यां प्रदर्शनीया। पुरःस्थितस्य बलहीनता क्षन्तव्या। ऐश्वर्यवन्तमपि, दारिद्रयवन्तमपि, दुःखितमपि, सुखपुरवशमपि निर्दोषिनं वा दोषिनमपि सखा नपरित्याज्यः इति रामायाणवचनम्। सुग्रीवः पट्टाभिषेकानन्तरं राज्यसुखभोगलोलुपः रामकार्यं विसस्मार। तदा रामः लक्ष्मणं सुग्रीवसकाशं प्रेषयन् सुग्रीवं प्रति ''कटुवाक्यानि कदापि न वक्तव्यानि इत्युवाच। अत्र रामस्य स्नेहमूल्याता विज्ञया। एकेन स्नेहाचरणं सुलभमेव। आद्यन्तं तत्स्नेहसंरक्षणं दुर्लभं भवति बहूनां। चञ्चलमनाः स्वल्पकारणैः स्नेहविघातं करोति। अतः मैत्रीबन्धः जागरूकतया महौदार्यतया परिरक्षणीयः।

वेङ्कटाद्रिसमं स्थानं
ब्रह्माण्डे नास्ति किञ्चन ।
वेङ्कटेशसमो देवो
न भूतो न भविष्यति ।।

तिरुमलतिरुपतिदेवस्थानम्

सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

गौरवसम्पादकः-
श्री मुद्दाड.रविचन्द्र, I.A.S.,
कार्यनिर्वहणाधिकारी,
ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः(F.A.C.)
डा।। वि.जि.चोक्कलिङ्गम्,M.A., Ph.D., P.G.Dip in JMC

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयक्रेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः,
सहायक-छायाचित्रग्राहकः,
ति.ति.दे.

सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
— *प्रधानसम्पादकः*

स्वस्तिश्री चान्द्रमानश्रीपराभवनामसंवत्सर आषाढबहुलतृतीया शनिवारादारभ्य-
श्रावणबहुलतृतीया-सोमवारपर्यन्तम् - २०२६

आगस्ट् - २०२६

सम्पुटिः-१३ सञ्चिका-०५

चक्रत्ताल्वारु 06
- पि.माधवी
कश्यपमहर्षि वर्षतिरुनक्षत्रम् 07
- आचार्य जि.पद्मनाभम्
कल्किजयन्ती 09
- डा. के.कोटेश्वरय्य
श्रीवरलक्ष्मीव्रतपूजाविधानम् 15
विखनोमुनिः वैखानसागमः 18
- लिङ्गारेड्डि उमामहेश्वरी-
शत्रुभिः स्नेहः आवश्यकतामनुसृत्य परिमिततया
भाव्या (चित्रकथा) 20
- डा. के.सूर्यनारायणरेड्डि
द्वादशराशीनां फलानि 22
- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः

मुखचित्रम् - तिरुचानूरु श्रीपद्मावतीदेवी।
अन्तिमपुटचित्रम्:- श्रीवल्लीदेवसेनासमेतषण्मुखस्वामिनः वर्णचित्रम्।



सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.
दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३
सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -
sapthagiri_helpdesk@tirumala.org

एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

बुद्धिमतां बुद्धिरपि कुटुम्बभरचिन्तया लयं याति।



महाविष्णोः पञ्चायुधेषु चक्रमेकम्। इदं सुदर्शनचक्रमिति वदन्ति। तमिलभाषायां वैष्णवपरम्परायां सुदर्शनचक्रं चक्रत्ताल्वारु इति वदन्ति। शंखचक्रगदाखड्गशार्ङ्गेषु चक्रस्यैवप्राधान्यम्। पुराणपरिशीलनात् दशावतारेषु महाविष्णुना चक्रप्रयोगसन्दर्भाः बहवः सन्ति। केचित् मत्स्यकूर्मवराह नारसिंहावतारेषु चक्रप्रसक्तिमधिकृत्य संशयान् व्यक्तीकुर्वन्ति। तेषां प्रश्नानां समाधानानि वर्तन्ते। वराहवतारेषु सुदर्शनचक्रं द्रष्ट्रादन्तत्वेन्त नरसिंहावतारे हस्तनखत्वेन परशुरामावतारे परशुत्वेन त्रिविक्रमावतारे शुक्राचार्यमन्धीकृतसन्दर्भे रामावतारे बाणत्वेन सुदर्शनः आविर्भूय तत्तात्कार्याणि चकारेति समन्वयं कुर्वन्ति। सुदर्शनं नाम मनोहरदर्शनम्। सुज्ञानप्रदानात् सुदर्शनः इत्यपि अर्थः वर्तते। सुन्दरस्वामिनः विष्णोः सौन्दर्यातिशयप्रदः सुदर्शनः। अयं सुदर्शनः स्वामिनः अलङ्कारप्रदः।

भगवद्गीतायां श्रीकृष्णं दृष्ट्वा अर्जुनः ''किरीटिनं गदिनं चक्रिणञ्चतेजोराशिं सर्वतोदीप्तिमन्तिम् इति वर्णयति। एवमेव अर्थभूषणाध्याये चक्रस्वरूपः मनोदितः विष्णुरिति दृश्यते। पञ्चायुधस्तोत्रे -

स्फुरत्सहस्रारशिवारितीव्रं सुदर्शनं भास्करकोटितुल्यं।
सुरद्विषां प्राणविनाशिविष्णोश्चक्रं सदाहं शरणं प्रपद्ये।।

इति चक्रमेवं स्तुतम्।

सुदर्शनचक्रसम्बन्धविशिष्टं महद्वाङ्मयं वर्तते। मयूरकविः स्रग्धरावृत्ते सूर्यशतकं प्रणिनाय। कूरनारायणमुनिः सुदर्शनाष्टकं व्यरचीत्। वेदान्तदेशिकः षोडशायुधस्तोत्रे महाविष्णोः षोडशदिव्यायुधानि वर्णयन् चक्रत्ताल्वारोः महत्त्वं वर्णयामास। महाविष्णोः षोडशास्त्राणि सुदर्शनस्वामिहस्तत्वेन वर्णितानि। एवं वेदान्तदेशिकैः सुदर्शनाष्टकं वर्णितम्।

सुप्रसिद्धमहाकाञ्चीपुरसमीपस्थतिरुप्पुक्कुलिवासिनां आयुरारोग्यैश्वर्यरक्षणार्थं विषज्वरपरिहारार्थं इदं सुदर्शनस्तोत्रं रचितमिति वदन्ति। पाञ्चरात्रागमे अहिर्बुध्न्यसंहितायां बहुषु अध्यायेषु सुदर्शनचक्रप्रस्तुतिः वर्तते। वैष्णवालयेषु सुदर्शन स्वामिनः प्रत्येकालयाः वर्तन्ते इति विशेषोऽयमंशः। तिरुमलक्षेत्रे वराहस्वाम्यालयपुरतः पश्चिमदिशि स्वामिपुष्करिणीविग्रहः वर्तते। एवं तिरुपतिपट्टणेऽपि ति.ति.देवस्थान परिपालनभवन समीपे वरदराजस्वाम्यालये सुदर्शनालयः वर्तते।

तमिलदेशे कुम्भकोणेमधुरै समीपे तिरुमोगुकाञ्चीपुरं वरदराज स्वाम्यालयसमीपे सुदर्शनस्वामिविग्रहः वर्तते। वैष्णवालयेषु गर्भालये पञ्चबेरेषु चक्रमपि वर्तते। बलिचक्रवर्तिसमर्पणवेलायां चक्रत्ताल्वारु आधिकारिकतया प्रवर्तितवानिति विशेषोऽयमंशः।

तिरुमलक्षेत्रे चक्रत्ताल्वारोः प्रत्येकगौरवं वर्तते। ब्रह्मोत्सवानां सम्यक् निर्वहणाय सुदर्शनः एव प्रधानहेतुभूतो वर्तते। अत एव ब्रह्मोत्सवानां समाप्तौ तीर्थवारिदिने उत्सवमूर्तिभिःसह चक्रत्ताल्वारोः तिरुमञ्जनादयः (चक्रस्नानम्) प्रवर्तन्ते। अस्य अन्यदपि कारणं वर्तते। वेङ्कटाचलमाहात्म्ये एवमुक्तम् - स्वामिनः अविर्भावात् पूर्वं राक्षसनिलये सति दैवक्षेत्रे दैवदर्शनार्थं बहुविघ्नेषु प्राप्तेषु स्वामी एव राक्षससंहारार्थं सुदर्शनमादिदेशेति वेङ्कटेश्वरसम्बन्धिपुराणानि सूचयन्ति।

कृष्णावतारे द्वापरयुगे शिशुपालवधम् बाणासुरवधनरकासुवधमित्यादि वृत्तान्तेषु चक्रायुधविहारः वर्णितः। वैष्णवप्रबन्धेषु बहुषु स्थलेषु चक्रत्ताल्वारुप्रसक्तिः दृश्यते। पेरियाल्वारु, आण्डाल् कुलशेखराल्वारु तिरुमलिशै नम्माल्वारु मनवालमहामुन्यादिभिः सुदर्शनस्वामी बहुधा कीर्तितः। एवं सुदर्शनचक्रं न केवलं स्वामिरक्षकः भक्तरक्षकोऽपीति वैष्णवाः वर्णयन्ति। चक्रस्नानसमये तिरुत्ताण्डकपठनसम्प्रदायः वर्तते।

आन्ध्रवाङ्मये वैष्णवकवयः स्वावतारिकासु सुदर्शनचक्रं कीर्तयामासुः। ताल्लपाककविभिः सुदर्शनमन्त्रोपासनया सह कीर्तनान्यपि विरचितानि। तेषु पेद्दतिरुमलाचार्यः सुदर्शनामक ''रगड'' मपि रचयामास। अद्यापि पवनगणपतिहोमवत् सुदर्शनहोमः मानवेभ्यः शुभफलितानि दत्वा तेषां कामितार्थफलदायि भवतीति वैष्णवानां विश्वासः।

।।ॐ नमो सुदर्शनचक्रधारिणे महाविष्णवे।।

कश्यपमहर्षि वर्षतिरुनक्षत्रम्

- आचार्य जि.पद्मनाभम् चरवाणी -९२४७३२८२८६



कर्दमप्रजापतेः पुत्रका कला। कला-मरीचिमहर्षिपुत्रः एव कश्यपः। कश्यपस्य पिता युक्तकाले पुत्रस्य उपनयनादिसंस्कारान् कारयित्वा तपोवनञ्जगाम। ब्रह्माज्ञया दक्षप्रजापतिः स्वपुत्रिकासु अदितिः, दितिः दनुः, कला, अवायुः, सिंहिका मुनिः, कपिला, क्रोधा, प्रथा, क्रूरा, विनता, कद्रुः इत्येताः कश्यपाय दत्वा विवाहकार्यञ्चकार। कश्यपः सर्वाभ्यः पत्नीभ्यः संसारसौख्यं दत्वा पुत्रान् दास्यामीत्यवोचत्। केषुचिद्दिनेषु गच्छत्सु कश्यपमहर्षिकृपया, अदितिः, धाता, मित्रम् अर्यमः शुक्रः, वरुणः, अंशः भगः, विवस्वान् पूषः, सविता त्वष्टा, विष्णुः इति द्वादशादित्याः जाताः। कश्यपादेव दितेः, हिरण्याक्षहिरण्यकशिपुरितिद्वौ पुत्रौ जातौ। दनोः विप्रचित् शम्बरादिचत्वारिंशद्दानवाः जाताः। कालायाः विनाशनक्रोधादयः अष्टपुत्राः जाताः। अनयोः बलवीरादयः चत्वारः पुत्राः जाताः। सिंहिकायाः राहुः, मुनिनामकभार्यायाः भीमसेन उग्रसेनादयः गन्धर्वाः जाताः। कपिलायाः अमृतं, गोगणः, ब्राह्मणाः, धृताचीमेनकाद्यप्सरसः जाताः। क्रोधायाः क्रोधपरगणाः जाताः। प्रथायाः, सिद्धादयः, क्रूरायाः सुचन्द्र चन्द्रहन्तादयः पुत्राः जाताः।

कश्यपप्रजापतेः कद्रूविनताभ्यां सन्ततिः - कद्रूविनते पुत्रसन्तत्यपेक्षया कश्यपमहर्षिसकाशं गत्वा तमुद्दिश्य सहस्रवर्षपर्यन्तं तमाराधयामासुः। तत्सेवया तुष्टः कश्यपः वरान् याचतामित्यवोचत्। कद्रूः सहस्रपुत्रान् अयाचत। विनता सहस्रपुत्राधिकबलाढ्यौ द्वौ पुत्रावयाचत। कश्यपः तदभिलाषमङ्गीकृत्य उग्रतपसा इन्द्रदिदिदेवतावालखिल्यादि ऋषिगणसाहाय्यं स्वीकृत्य पुत्रकामेष्टियागमकार्षीत्। तस्मिन् यज्ञे अङ्गुष्टमात्रदेहान् अनवरततपोपसनाकृशीभूतगात्रान् वालखिल्यादीन् दृष्ट्वा इन्द्रः अपहास्यञ्चकार। कुपिताः ते इन्द्राधिकशतपर्यायबलाधिकपुत्रः कश्यपस्य जातो भवतु इति द्वितीयेन्द्रो भवतु इति महामन्त्रैः होमञ्चक्रुः। भयकम्पितः इन्द्रः कश्यपमेव शरणमवाप। कश्यपमहर्षिः लोकसंरक्षणार्थं वालखिल्यादिमहर्षीन् प्रार्थयित्वा भुवनप्रवृत्तेः विपरीतं मास्तु इति आत्मनः जायमानः पुत्रः पक्षिकुलस्येन्द्रः भवतु इति तानाश्वासयामास। पश्चात् कश्यपः कद्रूविनताभीष्टं पूरयितुं स्वगर्भे परिरक्षतां इत्यवोचत्। गच्छतिकाले तयोः गर्भे अण्डान्युद्भूतानि। तानि घृतकुण्डेषु निक्षिप्य रक्षतःस्म। वर्षशतानन्तरं कद्रूगर्भाण्डः क्रमशः छिन्नः। तेभ्यः शेषः वासुकिः, तक्षकः, कर्कोटकः, धनञ्जयः, काळियः इत्यादि महाशक्तियुताः सहस्रनागमुख्याः उद्भूताः। विनतागर्भाण्डात् पुत्राः न जाताः इति एकमण्डं विच्छेदितवती। तस्मात् अनूरुः जातः। अकालाण्डछेदिनीं मातरं विनिन्द्य अहमङ्गविहीनोऽभवमिति विचिन्त्य द्वितीयमण्डं उचितकालपर्यन्तं प्रतीक्षस्वेति मातरमुक्त्वा सूर्यसारथिरभूत्। पश्चात् चिरकालानन्तरं द्वितीयाण्डात् गरुत्मानजायता।

कश्यपेन गरुत्मतः आशीर्वादः - गरुत्मान् मातृदास्यविमोचनार्थं मात्राज्ञया समुद्रस्थ निषादभक्षणादपि अतृप्तक्षुदूबाधः बभूव। पिता कश्यपः गजकूर्मरूपविभावसुप्रतीकब्राह्मणौ खादितुमनुमतिं ददौ। ततः पित्राज्ञया अलम्बतीर्थे रौहिणवृक्षशाखावलम्बिवालखिल्यान् शाखास्थानेव गन्धमादनपर्वतपर्यन्तं नीत्वा पितरं नमश्चकार। वालखिल्याः कश्यपानुमत्या अन्यत्र जग्मुः। ततः गरुत्मानति वेगेन हिमगिरिं गत्वा तत्र गजकच्छपशरीराणि भक्षयित्वा महाबलसम्पन्नः अमृतमानीय, मातरं शापविमुक्ताञ्चकार।

भूमेः काश्यपीनाम - पुरा परशुरामः २१ पर्यायं भूमि निःक्षत्रियं कृत्वा पापविमुक्तये अश्वमेधयागानन्तरं कश्यपमहर्षेः भूमिं दानं ददौ। कश्यपः लोकसंरक्षणार्थं भूमिं गृहीत्वा निश्शेषराजवंशत्वनिवारणाय पूरशुरामं दक्षिणाब्धिपारदेशं गन्तुमादिदेश। शूर्पाकारप्रदेशे समुद्रेण दत्ते परशुरामः तत्र तपः कुर्वन्नासीत्। कश्यपः भूमिं भूसुरेभ्यः दानं दत्वा तपोवनं जगाम। तस्मात्कालात् भूमेः काश्यपीति नाम आगता।

गङ्गायाः अपि काश्यपीति नाम - नैमिशारण्यऋषयः स्नानपानार्थमनुकूलां गङ्गानदीं भूमौ प्रवाहयितुं प्रार्थयामासुः। कश्यपः घोरनिष्ठया शिवं तोषयामास।

शिवः स्वजटाजूटात् गङ्गामेकभागत्वेन भूमौप्रवाहयामास। तृप्ताः गङ्गां ऋषयः कश्यपमभिनन्द्य गङ्गावाहिन्याः काश्यपीति नाम चक्रुः। इयं काश्यपी कृतयुगे कृतवती त्रेतायां गिरिकर्णिका द्वापरे चन्द्राभागा, कलौ सौभ्रमतीति जगद्विख्यातासीत्।

सौभ्रमती सर्वपापसहारिणी। एतन्नदीतीरे दत्तात्रेयविश्वामित्रादयः तपोनिष्ठाः नित्यनिवासिनः आसन्। अत्र रुद्रहृदादितीर्थानि अन्तर्वाहिन्यः प्रवहन्ति। कपिलतीर्थादितीर्थानि सौभ्रमतीनदीद्वारैव अन्तर्वाहिनीरुपेण जातानि। कश्यपमहर्षितपःप्रदेशः काश्यपतीर्थमिति तन्निमित्तकुण्डं काश्यपकुण्डमिति वदन्ति। कश्यपः कुशेश्वरकुण्डं संस्थापयामास। काशीक्षेत्रतुल्यमपि कश्यपः तत्र महानगरं निर्ममे। कश्यपतीर्थस्नानात् सर्वपापविमुक्तिर्भवेत्।

कश्यमेन राजभ्यः भूदानम् - भूमौ अधर्माभिवृद्धिः यज्ञयागानिर्वाहः, अक्रमाधिक्यात् भूमाता महादेषैः पातालंगन्तुमुद्युक्ता कश्यपं धर्मरक्षणार्थं प्रार्थयामास। तदा सः तां भूमिं स्थिरीकृत्य पूर्वरूपे निवेशयामास। भूदेवी एतत्सन्तोषजननकारणात् काश्यपं नमस्कृत्य उत्तमक्षत्रियपालनेन धर्मसुराक्षणार्थमयाचत। परशुरामेण अनिहताः हैहयाः पौरवंशजविदूरथपुत्रः, ऋक्षपर्वतऋक्षाः सौदामिनी वंशे पराशरः। यज्ञानाचरन्तः जीवन्तीति, पुनः शिबिपौत्रः गोपतिः वने गोरक्षकत्वेन, प्रतर्दनपुत्रः वत्सराजः इत्येते जीवन्तीति तानाहूय पुनः भूपतीनूकर्तुं कश्यपे पार्थिते सः तेभ्यः सर्वेभ्यः भूमिं विभज्य राज्याभिषिक्तान् कृत्वा धर्मपालकान् चकार। क्रमशः नृपवंशे अनेके राजानः धरणीभारं वहन्तिस्म।

कश्यपात् अदितेः वामनजननम् - बलिः भृग्वादिब्रह्मवादिनः अर्थयित्वा अनन्तबलोपेतः स्वर्लोकमाचक्राम। इन्द्रादिदेवताः कामरूपं धृत्वा अज्ञातप्रदेशं जग्मुः। बलिः ऐश्वर्यवैभवेन शताश्वमेधानाचचार।

अदितिः स्वसन्ततिदुःस्थितिंदितिपुत्रप्राबल्यं उक्त्वा स्वपुत्ररक्षणार्थमयाचत। कश्यपः भाविकालगतिं ज्ञात्वा नारायणं प्रार्थितुमुपदिदेश। पयोभक्षणव्रतात् तत्कालमन्त्रोच्चरणात् श्रीमन्नारायणः प्रत्यक्षीभूतः तस्याः पुत्रत्वेन जनिष्यामीति भर्तुसेवापरा भवेत्युक्त्वा अन्तर्हितः। भर्तुशुश्रूपापरायां तस्यां कश्यपसम्भोगात् अदितिगर्भे शंखचक्रगदाधरः कौरस्तुभाभरणः विष्णुः प्रविवेश। ततः कश्यपः रूपान्तरं गृहीत्वा वामनोभूत्वा कश्यपगृहे वर्धतेस्म। कश्यपः युक्तकाले तस्य उपनयनं निर्वाहयामास। सविता सावित्रीमुपदिदेश। बृहस्पतिः यज्ञोपवीतं कश्यपः मौञ्जीं अदितिः कौपीनं ब्रह्मा कमण्डलुं सरस्वती अक्षमालिकां सप्तर्षयः कुशपवित्राणि ददुः। एवं वामनः पित्राज्ञां स्वीकृत्य बलिचक्रवर्तिसकाशं गत्वा पदत्रयदानरूपे पातालं बलिं प्रेषयित्वा स्वर्लोकराज्यं निजसोदरेभ्यः दत्वा मातृकांक्षां पूरयामास।

कश्यपेन एवं वसुदेवत्वेन दशरथत्वेन परिणामः - कदाचित् कश्यपः कद्रूकामवांछापूर्त्यर्थं तया रमतेस्म। तस्मिन्नेव समये विनतापि भर्तुसम्भोगमपेक्ष्य वस्त्रालङ्कारभूषिता कश्यपाश्रमञ्जगाम। कद्रूसहितं पतिं दृष्ट्वा कोपोद्रिका नरजन्म प्राप्नुवतामिति तौ शशाप। शापफलात् कश्यपः वसुदेवत्वेन, कद्रूः देवकीत्वेन जन्मजगृहतुः। कश्यपः प्रतिजन्मनि आत्मनः एव विष्णुमूर्तिः कुमारत्वेन अवतरणाय प्रार्थयामास। विष्णुः अङ्गीकृत्य अदितिकश्यपोः वामनमूर्तित्वेन अजायत। वसुदेवरूप कश्यपस्यैव देवक्यां कृष्णः अजायत। कश्यपः एव दशरथोभूत्वा कौसल्यातः श्रीरामचन्द्रपुत्रं लेभे। एवं कश्यपस्य अभिलाषः परिपूर्णः आसीत्।

पुरा कदाचित् कश्यपः समुद्रस्य होमधेनूः तदनुमत्या स्वगृहं नीत्वा चिरकालं गोक्षीरफलमनुभवति स्म। पश्चात् समुद्रेण धेनुः प्रत्यर्पयितुं पृष्टोऽपि अदितिकपिलयोः अनङ्गीकारात् समुद्रः निवृत्तः। समुद्रेण ब्रह्मा निवेदितोऽपि प्रयोजनाभावात् ''कश्यपः भूमौ गोपालकः भवतु'' इति समुद्रः शशाप। एतच्छापात् कश्यपः वसुदेवगृहे जातः कंसस्य गोगणस्य अधिपतिर्बभूव।

कश्यपाद्दितेः मरुद्गणोत्पत्तिः - इन्द्रः दितिपुत्रान् बाधतेस्म। तदा दितिः इन्द्रबलसमानपुत्रप्राप्तये भर्तुशुश्रषाञ्चकार। कश्यपाङ्गीकारात् दितिः गर्भिणी जाता। इन्द्रः दितिं स्वसेवांकर्तुमाज्ञापयामास। दितिः अङ्गीचकार। कदाचित् दितिः अशुचिर्भूत्वा निद्रातिस्म। तत्समये इन्द्रः गर्भस्थशिशुं सप्तखण्डान्चकार। जाताः सप्तशिशवः रुदन्ति स्म। तदा तानपि सप्तखण्डान् इन्द्रश्चकार। दितिः निद्रातः उत्थाय विषयं ज्ञात्वा जाताः पुत्राः मित्राण्येव भवेयुरिति कथनात् अनुगृह्य इन्द्रः तानहत्वा जगाम। एवं नवाधिकचत्वारिंशद्भूत्वा मरुद्गणनाम्ना प्रसिद्धिमवापुः।

(अनुवर्तते १९)

कल्किजयन्ती हिन्दूनां पर्वदिनम्। विष्णोः दशावतारेषु कल्क्यवतारः दशमः अन्तिमः अवतारः। कल्किजन्मदिनमेव कल्किजयन्तीति पर्वदिनमिति निर्वहन्ति। कल्किभगवान् कलियुगान्ते दुष्टनिर्मूलणाय असुरं कलि धर्म पुनरुद्धरणाय कालचक्रं सत्ययुगत्वेन परिणामयितुं जनिष्यति। साम्प्रदायिक हिन्दूज्यौतिषकालमानमनुसृत्य भाद्रपदमासे शुक्लपक्षे द्वादशीदिने कल्किजन्मदिनोत्सवं निर्वहन्ति। चन्द्रवृद्धिदशायां द्वादशदिनमिदम्।

जयन्ती प्रामुख्यम् - पुराणान्यनुसृत्य शम्बलग्रामे - एकस्मिन् ब्राह्मणकुटुम्बे कल्किभगवान् जनिष्यतीति प्रोक्तम्। उपपुराणेषु कल्किपुराणमेकं वर्तते। भगवतः कल्केः सुमतिविष्णु यशोनामकौ मातापितरौ। इयं संघटना कलिकयुगान्ते प्रारभ्यते। कल्किभगवन् युवकत्वेन वर्धमानः विद्याशिक्षणानन्तरं युद्धयोधो भवति। अयं देवदत्तनामकदैविकश्वेताश्वे गच्छन् ज्वलत्खड्गंधृत्वा भाषमानशुकेन सह विहरन् स्यादिति विवृतम्। भूतभविष्यद्वर्तमानत्रिकालज्ञः अयम्। अयं दुष्टराज्यपालकैः राजभिः सह योद्धुं प्रपञ्चं परिभ्रमति। अयं जीवनियन्त्रणायतान् अधर्मप्रवृत्तान् हत्वा योगशक्तिसमन्वितः भवति। पश्चात् सः धर्मोद्धरणं कृत्वा स्वराज्यं वैकुण्ठं गच्छति। कल्किपर्वदिने भक्ताः प्रातः एव निद्रोत्थिताः सूर्योदयात् पूर्वं स्नानमाचरन्ति। बीजमन्त्रैः पूजा प्रारभ्यते। जपानन्तरं कल्केः आसनसमर्पणं प्रवर्तते। पश्चात् मूर्तिमभिषिच्य पञ्चामृतेन शुचिंकृत्वा पुष्पदीपधूपार्पणैः सह नैवेद्यं समर्पयन्ति। अस्मिन्समये हरिस्तोत्रपारायणं विष्णुसहस्रनामपठनं, ओं नमो भगवते वासुदेवाय इति अन्यमन्त्राण् च १०८ पर्यायं जपन्ते। पश्चात् दानधर्मादीनाचरन्ति। कल्किभगवान् मौक्तिकविग्रहरूपे रूपद्वयेन सम्पूज्यते। एकस्मिन् रूपे खड्गं स्वीकृत्य अश्वे प्रचलति। केषुचिद्रूपेषु दुर्मार्गान् दुष्टान् विनाशयति। उत्तरभारते एकमेव चित्रं चित्रीकृतं दृश्यते। दक्षिणभारते सर्वसाधारणतया अश्वमुखेन ऊर्ध्वमुखेन तिष्टन्निव दृश्यते। कल्किः दुष्टानाशकः शिष्टरक्षकः। दुष्टेभ्यः सद्धर्मयुतान् परिरक्षतीति कल्किपदनिर्वचनार्थः। अष्टमशताब्दयां काञ्चीपुरे कल्किकृष्णस्य चक्रवर्तिरूपमासीत्। कल्किजयन्तीदिने दानाचरणात् शत्रुबाधाविमुक्तिः, सर्वं शुभं स्यादिति शास्त्रवचनम्। कलियुगान्ते अनन्तपापवृद्धित्वात् सृष्टेः प्रमादस्थितौ कल्किभगवान् सम्पूर्णधर्मसंस्थापनं करिष्यतीति शास्त्रवचनम्।

भागवतं कल्किपुराणमनुसृत्य सत्ययुगसन्धिकाले अवर्तीणः महाविष्णुः ६४ कलापूर्णः दुष्टशिक्षण शिष्टरक्षणं करिष्यतीति भागवते द्वादशस्कन्धे द्वितीयाध्याये प्रोक्तम्।

अयं भगवान् उत्तरप्रदेशस्थमोर्दाबादू समीपे शम्बलग्रामे जनिष्यतीति अस्य सोदराश्च देवतावताराः स्युरिति विज्ञायते। अस्य भार्याद्वये एकालक्ष्मीरूपा, द्वितीया वैष्णवीशक्तिरूपा। इयं त्रेतायुगात् श्रीरामं परिणेतुं वैष्णवीदेवीत्वेन तपः आचरन्ती स्यात्। विष्णुः इमांकलियुगे परिणेष्यामीति वरं ददौ। इयमेव अद्यापि जम्मूराष्ट्रे काट्राप्रदेशे वैष्णवीदेवीत्वेन तपः आचरन्ती वर्तते इति अत एव वैष्णोदेवीदर्शनात् कामितार्थसिद्धिः अस्माकं शत्रुपराजयः स्यादिति महाविश्वासः वर्तते। विष्णुः नारायणो वा कल्क्यवतारे वर्तते इति भावयित्वा विग्रहः छायाचित्रं वा पूजनीयम्। ब्राह्मणेभ्यः गोदानात् पितृदेवताभ्यः सद्गतिप्राप्तिर्भवेदिति शास्त्रवचनम्। विविधशास्त्राधारतया प्राज्ञैः उक्तरीत्या प्रचारे विद्यमानोऽयमंशः।

कल्किभगवद्रूपेण श्रीहरेवतारः - यज्ञयागाद्यभावात् हविर्भागविहीनाः बाधिताः देवाः ब्रह्मसकाशं गत्वा स्वबाधाः विज्ञापयामासुः। ब्रह्मा श्रीमन्नारायणः एव शरण्यमिति तत्सकाशं देवैः सह जगाम। श्रीहरिः तानाश्वास्य "माभीः" शम्बलग्रामे विष्णुयशो नाम ब्राह्मणः महनीयः वर्तते। मदंशः तद्गर्भे प्रविशेत्। इयं लक्ष्मीः सिंहलद्वीपे बृहद्रथनामकस्य राज्ञः भार्यायां कौमुदीनाम्न्या जाता, पद्मावती नाम्ना वर्धमाना स्यात्। यूयं सर्वे त्वदंशैः मम बन्धुत्वेन जनिष्यन्ति। तदाऽहं भूभारं परिहरिष्यामि देवाः अपि मम भक्ताः भविष्यन्ति। तान् भारतवर्ष मण्डलाधीश्वरान् कृत्वा कृतयुगधर्मान् पुनरुद्धृत्य गोलोकं गमिष्यामीत्यवोचत्। ब्रह्मादिदेवताः तच्छृत्वा सानन्दंनिजावासस्थानं जग्मुः।

कल्किदेवस्य विद्याभ्यासः - शुक्लपक्षचन्द्र इव प्रवर्धमानस्य अस्यकविः प्राज्ञः, सुमन्तः इति सोदरत्रयमासीत्। ते सर्वे गुरुभक्तियुताः सर्वविद्यानिपुणाः पितृभक्ताः आसन्। विशाखयूपोनाम राजा तद्देशपालकः आसीत्। ततः पिता कल्किभगवते आध्यात्मिकशास्त्रविषये पृष्टप्रश्नानां समादधौ। कलियुगप्रभावेण ब्राह्मणाः धर्माचरणदूराः बभूवुरिति पितृवाक्यात् कल्किभगवान् कलिपुरुषं कुपितः तं शप्तुममन्यत। ऋषिसमक्षे यथाविधि उपनयनं प्राप्य सूर्यवदप्रकाशत।

परशुरामात् कल्किमूर्तेः विद्याभ्यासः - ततः शस्त्रास्त्रविद्याः अधीत्य गृहात् बहिरागत्य परशुरामेण दृष्टः तत्परिचयमवाप। ततः कल्किः परशुरामेण सह महेन्द्रगिरिं प्रविश्य तस्मात् गुरोः चतुःषष्टि कलाः धनुर्विद्यया सहचतुर्वेदान् मासचतुष्टये

अधीत्य सकलविद्याप्रपूर्णः गुरुदक्षिणा किं दातव्यमिति परशुराममपृच्छत्। परशुरामः मत्तः प्राप्ताः सर्वविद्याः त्वज्जयनिमित्तं उपयुक्ताः भवन्तु। त्वं श्रीहरिपूर्णांशेनजातः। पार्वतीपरमेश्वरौ सकलशास्त्रनिष्णातं त्वां आशीर्वचनैः करिष्यतः। त्वं धर्महीनपालकान् निर्मूल्य दिग्विजयानन्तरं मरुत्देवापिनामक क्षत्रिययोः राज्यं दास्यसि। सिंहलद्वीपपद्मावतीपाणिग्रहणं करिष्यसि इत्यवोचत्। एतच्छ्रुत्वा कल्किः परशुरामादाशीर्वादं प्राप्य बिल्वोदकेश्वरक्षेत्रे पार्वती परमेश्वरौ अस्तौषीत्। पार्वतीपरमेश्वरौ तमङ्के निवेश्य त्वं श्रीहरिः त्रिलोकाधिपतिः। कलिभारनिवारणाय जातोऽसीति चतुर्दशभुवनानि क्षणकाले परिभ्रम्य आगमिष्यसीति गरुडाश्वमिमं कालगमनं, रत्नखचितकरवालञ्च स्वीकुरु इत्यवोचताम्। तच्छ्रुत्वा कल्किः परमानन्दभरितः तदाशीर्वादं स्वीकृत्य अश्वमधिरुह्य शम्बलग्रामं गत्वा आत्मनाप्राप्तविद्याः वरान् च पितरावुवाच। ततः तद्देशपालकविशाखयूपमहत्त्वं ज्ञात्वा त्वं धर्महीनपालकान् निर्मूल्य दिग्विजयानन्तरं मरुत् देवापिनामकक्षत्रियायोः राज्य दास्यसि। सिंहलद्वीपपद्मावती पाणिग्रहणं करिष्यासि इत्यवोचत्। एतच्छ्रुत्वा कल्किः परशुरामदाशीर्वादं प्राप्य बिल्बोदकेश्वर क्षेत्रे पार्वती परमेश्वरौ अस्तौषीत्। पार्वतीपरमेश्वरौ तमङ्के निवेश्य त्वं श्रीहरिः त्रिलोकधिपतिः। कलिभारनिवारणाय जातोऽसीति चतुर्दशभुवनानि क्षणकाले परिभ्रम्य आगमिष्यतीति गरुडाश्वमिमंकालगमनं रत्नखचितकरवालञ्च स्वीकुरु इत्यवोचताम्। तच्छ्रुत्वा कल्किः परमानन्दभरितः तदाशीर्वादं स्वीकृत्य अश्वमधिरुह्य शम्बलग्रामं गत्वा आत्मना प्राप्तविद्याः वरान् च पितरावुवाच। ततः तद्देशपालकविशाखयूपमहत्वं श्रुत्वा ''त्वं संदर्श्य विष्णुभक्तेषु त्वमग्रगण्यः, धर्मवर्तनेन प्रजाः पालय। सृष्टौ ब्राह्मणक्षत्रिय वैश्य-शूद्र-ब्रह्मचारि-गृहस्थ-वानप्रस्थादयः प्रधानाः। एते कलिबाधापीडिताः स्वधर्मान् परित्यज्य भ्रष्टाः सञ्जाताः। एतान् स्वधर्मनिरतान् कर्तव्यम्। त्वमश्वमेधयागं कृत्वा देवताः सन्तोषय। देवतातृप्त्या सकालवर्षपातात् सस्य समृद्धिः भवेत्।'' एतच्छ्रुत्वा राजा राजनीतिधर्मान् विज्ञाय कल्किदेवानुमत्या स्वराज्यं गत्वा धर्मभरितं पालयति स्म। शुकमहर्षिद्वाराप्रबोधितः कल्किभगवान् कौमुदीबृहद्रययोः राजदम्पत्योः पुत्रिकां लक्ष्मीं स्वयंवरे उपयेमे। ततः शम्बलग्रामे विश्वकर्मणा कल्क्यर्थं पुरनिर्माणं कृतम्।

कल्किमूर्तिदिग्विजयः - कल्किभगवान् कल्किपुरे देवताराधनपितृपूजानिन्दकान् आत्माभिमानिनः कुलजाति विचक्षणरहितान् जैनबौद्धान् विशाखभूपसाहाय्यान् खड्गाद्यस्त्रैः जघान। ततः शिष्टान् शत्रुन् निमेषे हत्वा पतिहीनाः तद्भार्याः उद्दिश्य ज्ञानोपदेशं कृत्वा भक्तिवैराग्यभावनया मुक्तिं प्रप्तुमुपदिदेश। ततः वालिखल्यादिमहर्षिबाधाः श्रुत्वा कारणभूतां कुथोदरी तत्पुत्रं विकुञ्जं परशुरामदत्तब्रह्मास्त्रेण जघान। ततः गङ्गास्नानमाचर्य मुनिबृन्दद्वारा ते पूर्वजन्मनि क्षत्रियाः सूर्यवंशजाः इति ज्ञात्वा श्रीरामायणकथां तद्वारा श्रुत्वा ततः चन्द्रवंशराजचरितमपि विज्ञाय ततः मरुत्देवाप्योः राज्यं दत्वा तयोः विमानद्वयं कामगमनं दिव्यायुधविशिष्टं च दत्वा विशाखयूपपुत्रिकां मरुते रुचिलाश्वपुत्रिकां देवापेः दापयित्वा तयोः विवाहं कारयामास। ततः कृतयुगः यतिरूपेण कल्किं सन्दर्श्य त्वं त्रिमूर्तीः इन्द्रादिचतुर्दशमनुस्रष्टा इति कृतयुगधर्मस्थापनात् त्वां द्रष्टुमागतोऽस्मीत्यवोचत्। ततः सुशान्ता-शशिध्वजाभ्यां प्रार्थितः तत्पुत्रिकाश्च परिणीतवान्। काञ्चनपुरप्रवेशे गन्धर्वभार्या विषनेत्री कल्किं दृष्ट्वा शापविमुक्ता आसीत्। ततः कल्किः नागकुलं निर्मूल्य काञ्चनपुरे बृहन्नलं अयोध्यायां मरुतं हस्तिनापुरे देवापिं पट्टाभिषिक्तान् चकार। ततः शम्बलग्रामे निजभवने वसन् सोदरस्य कल्केः शौम्भकदेशं प्राज्ञस्य पौण्ड्रदेशं सुमन्तस्य पुलिन्ददेशं, स्ववंशेभ्यः अन्येभ्यः इतरदेशान् दत्वा शम्बालमण्डलस्य स्वयमेव राजाभूत्वा अनर्घधनराशीन् पितृभ्यः दत्वा यावज्जम्बूद्वीपे धर्मपरान् राज्ञः प्रतिष्ठाप्य कृतयुगे धर्मान् सर्वत्र व्यापयित्वा चतुर्वर्णस्थान् स्वस्वकुलधर्मस्थितान् विष्णुपूजारतान् कृत्वा स्त्रियः पतिव्रता धर्मनिरतान् चकार। राजानः यज्ञदीक्षापराः सकालवर्षैः प्रजासुस्वुसुखजीवनकारकाः आसन्। ततः पित्रा राजसूयवाजपेयाश्वमेधादियागान् निर्वर्तयित्वा समस्त जीवराशिं संतृप्तां चकार। पिता विष्णुयशः नारदोपदेशं प्राप्य पुत्रानुमत्या भार्यया सह बदरिकाश्रमेध्याने अयं योगमार्गे शरीरं परित्यज्य दिव्य शरीरेण वैकुण्ठं जगाम। सुमतिश्च ततः सहगमनञ्चकार। कल्किमूर्तिः दर्शनार्थमागतान् परशुरामात् स्वभार्यद्वारा सन्तानप्राप्त्युपायं विज्ञाय द्वापरयुगे रुक्मिणीव द्रौपदीव व्रतमाचरितुमुपदिष्टः तद्वतं भार्यया रमादेव्या आचारयित्वा मेघनाथ, वलाहकपुनामकपुत्रजनकः बभूव।

ततः कल्किमूर्तिः सहस्रवर्षपर्यन्तं भार्याभिः सुखजीवनं यापयित्वा प्रजारञ्जकतया राज्यं पालयन् आदर्शगृहस्थ धर्मं लोकादर्शप्रायं प्रजायै दर्शयामास। ततः ब्रह्मादिदेवाः शम्बलग्रामं प्राप्य तव दुष्टशिक्षणशिष्टरक्षणावतारप्रयोजनं सम्पर्णम्। अद्य वैकुण्ठमागगच्छेति प्रार्थयामासुः। तच्छ्रुत्वा कल्किः स्वपुत्रं राज्याभिषिक्तं कृत्वा अन्यपुत्रेभ्यः हितमुपदिश्य प्रजाभ्यः ज्ञानोपदेशं कृत्वा भार्याभिः देवताभिश्च परिवृतः गङ्गातीरं गत्वा योगासने प्रायोपविष्टः आत्मावलोकनं कृत्वा प्राणान् तत्याजा। तत्क्षणमेव दिव्यमङ्गलविग्रहः चतुर्भुजस्सन् दिव्यविमाने वैकुण्ठं जगाम। तद्भार्याश्च पतिव्रताः धर्ममनुसृत्य सहगमनं चक्रुः।

ज्ञातव्याशः - श्रीवरलक्ष्मीव्रतं श्रावणमासे पौर्णम्याः पूर्वागत शुक्रवारे तिथिः या कापि वा भवतु आचरणीयम्। यदि कोऽप्यवरोधः आगतश्चेत् श्रावणमासे यस्मिन् कस्मिन्नपिशुक्रवारे आचरणीयम्। तदाप्साध्यश्चेत् दशरायामागत शुक्र वासरे आचरणीयमिति वदन्ति।

सूचना - दीपाराधनम्, संकल्पः, कलशपूजा, गणपति पूजाविषयाः विनायकव्रते विद्यमानाः एव कर्तव्याः संकल्पे तु अधोक्तविधानवत् वक्तव्यम्।

''अद्य ममोपात्त समस्त दुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभेशोभने मुहूर्ते (संवत्सरं इत्यादीनि वक्तव्यानि अस्माकं सहकुटुम्बानां क्षेमस्थैर्य विजयारोग्यैश्वाभिवृद्ध्यर्थं धर्मार्थकाममोक्ष चतुर्विध पुरुषार्थफल सिद्ध्यर्थं, सत्सन्तान सौभाग्य शुभफल प्राप्त्यर्थं वर्षे वर्षे प्रयुक्तां एतद्वर्षे श्रीवरलक्ष्मीदेवतां उद्दिश्य श्रीवरलक्ष्मीदेवताप्रीत्यर्थं भविष्योत्तर पुराणकल्पोक्तप्रकारेण यावच्छक्ति ध्याना वहनादिषोडशोपचार पूजां करिष्ये (इत्युक्त्वा श्रीवरलक्ष्मीचित्रपटे कलशे पुष्पाणि अक्षतान् समर्प्य नमस्कर्तव्यम् (पश्चात् कलशपूजा गणपतिपूजा कर्तव्या)

श्रीवरलक्ष्मीदेवीध्यानम् - ओं पद्मासने पद्मकरे सर्वलोकैकपूजिते।
नारायणप्रिये देवि सुप्रीता भव सर्वदा।।
ओं क्षीरोदार्णवसम्भूते। कमले कमलालये।
सुस्थिरा भव मे गेहे सुरासुरनमस्कृते।।
ओं वरलक्ष्मीदेवतां ध्यायामि (इत्युक्त्वा पुष्पाणि अक्षतान् - मातुः कलशः, पटसमीपे निक्षिप्य नमस्कर्तव्यम्।



आवाहनम् -
श्लो- ओं देवि त्रैलोक्य जननि! सर्वलोकैकपावनि!
आगच्छ वरदे! मातः प्रसीद परमात्मिके।
ओं श्रीवरलक्ष्मीदेवतामावाहयामि (इत्युक्त्वा पुष्पाणि अक्षताः लक्ष्मीपटे कलशे परिविकीर्य नमः कर्तव्यम्।

आसनम् -
श्लो - ओं स्वर्णरत्नमयं दिव्यं हेमवर्णं सुशोभितम्।
आसनं ते प्रदास्यामि स्वीकुरुष्व हरिप्रिये!
ओं वरलक्ष्मीदेवतायै नमः रत्नसिंहासनं समर्पयामि (इत्युक्त्वा मातुः कलशसमीपे पटसमीपे पुष्पाणि अक्षताःनिक्षिप्य नमस्कर्तव्यम्।

पाद्यम् -
श्लो - ओं गङ्गादिसलिलैर्युक्तं सुगन्धे सुवासितम्।
पाद्यं गृहाणि श्रीदेवि! सर्वदेवनमस्कृते।
ओं वरलक्ष्मीदेवतायै नमः पादयोः पाद्यं समर्पयामि इत्युक्त्वा कलशस्थजलं वारद्वयं उद्धरिण्या आदाय मातुः कलशसमीपे पादौ स्थितावि सम्भाव्य स्पृष्ट्वा तज्जलमर्घ्यपात्रे निवेशनीयम्।

अर्घ्यम् -
श्लो - ओं शुद्धोदकं च पात्रस्थं गन्धपुष्पादिमिश्रितम्।
अर्घ्यं दास्यामि ते देवि! गृहाणसुरपूजिते।।
ओं वरलक्ष्मीदेवतायै नमः हस्तयोः अर्घ्यं समर्पयामि। इत्युक्त्वा कलशजलं वारद्वयं उद्धरिण्या आदाय मातुः हस्तयोः स्पृष्ट्वा तज्जलं अर्घ्यपात्रे समर्पणीयम्।

आचमनीयम् -
श्लो - ओं सुवर्णकलशानीतं चन्दनागुरुसंयुतम्।
गृहाणाचमनं देवि! मयादत्तं शुभप्रदे।।
ओं श्रीवरलक्ष्मीदेवतायै नमः मुखे आचमनीयं समर्पयामि इत्युक्त्वा वारत्रयं उद्धरिण्या कलशजलं स्वीकृत्य मतुः मुखं संस्पृष्टं कृत्वा अर्घ्यपात्रे समर्पणीयम्।

पञ्चामृतस्नानम् - क्षीरं दधि, घृतं, मधु, शर्करामिश्रित द्रव्यम्)
श्लो ।। पयोदधि घृतोपेतं शर्करामधुसंयुतम्।
पञ्चामृतस्नानमिदं गृहालकमलालये।।
ओं वरलक्ष्मीदेवतायै नमः। पञ्चामृतस्नानं समर्पयामि इत्युक्त्वा पञ्चामृतं पुष्पेण स्पृष्ट्वा (आर्द्रीकृत्य पञ्चवारं किञ्चित् किञ्चित् मातुः कलशे पटे विकीर्णं कर्तव्यम्।

VEERA LAKSHMI

SANTHANA LAKSHMI

GAJA LAKSHMI

DHANYA LAKSHMI

VIJAYA LAKSHMI

DHANA LAKSHMI

ADHI LAKSHMI

AISWARYA LAKSHMI

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूतसमस्तदेववनितां लोकैकदीपाङ्कुरां।
श्रीमन्मन्दकटाक्षलब्धविभव ब्रह्मेन्द्रगङ्गाधरां
त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम्।।

लक्ष्मीदेवि! त्वं क्षीरसमुद्रराजतनया, श्रीरङ्गधामेश्वरी असि! समस्तदेववनिताः तव दास्यः। त्वं समस्तलोकप्रकाशकदीपज्योतिः। ब्रह्मेन्द्रशिवाः श्रीमत्याः तव अनुग्रहकटाक्षलब्धविभवाः भवन्ति। त्वं लोकत्रयस्यापि एककुटुम्बनी असि! पद्मोद्भवां विष्णुप्रियां त्वां वन्दे।

शुदोद्धकस्नानम् -

श्लो ।। ओं गङ्गाजलं मयानीतं महादेवशिरः स्थितम्।
सुगन्धिद्रव्यसंयुक्तं जलं स्नानाय गृह्यताम्।।

ओं श्रीवरलक्ष्मीदेवतायै नमः सुगन्धिद्रव्यसंयुक्त शुद्धोदकस्नानं समर्पयामि (इत्युक्त्वा) कलशजलं उद्धरिण्या आदाय तज्जलं पुष्पेण स्पृष्ट्वाकलशे पटे विकीर्णं कर्तव्यम्। स्नानानन्तरं आचमनीयं समर्पयामि इत्युक्त्वा कलशजलं उद्धरिण्या मातुः मुखं सन्दर्श्य अर्घ्यपात्रे निवेशनीयम्।

वस्त्रम् -

श्लो - ओं सुरार्चितांघ्रियुगले दुकूलवसनप्रिये।
वस्त्रयुग्मं प्रदास्यामि गृहाण हरिवल्लभे।।

ओं श्रीवरलक्ष्मीदेवतायै नमः वस्त्रयुग्मं समर्पयामि इत्युक्त्वा तूलवस्त्रे मातुः कलशस्य, मातुः पटस्य च धारणीयम्।

आभरणानि -

श्लो - ओं केयूरकङ्कणे दिव्ये हरनूपुर मेखलाः।
विभूषणानि अमूल्यानि गृहाण ऋषि पूजिते।।

ओं वरलक्ष्मी दैवतायै नमः आभरणानि, समर्पयामि। (पूर्वमेव आभरणानि मतुः अलङ्कृतानि स्युः अतः पुष्पाणि अक्षतान् स्वीकृत्य कलशे पटे निक्षिप्य नमः कर्तव्यम्।

यज्ञोपवीतम् -

श्लो - ओं तप्तहेमकृतं देवि! मुक्तादामसमन्वितम्।
उपवीतं मया दत्तं गृहाण त्वं शुभप्रदे।।

ओं वरलक्ष्मीदेवतायै नमः यज्ञोपवीतं समर्पयामि। इत्युक्त्वा तूलकृतयज्ञोपवीतं मातुः समर्पणीयम्।

गन्धः -

श्लो - ओं कर्पूरागरुकस्तूरीरोचनादिभिरन्वितम्।
गन्धं दास्याम्यहं देवि! प्रीत्यर्थं प्रतिगृह्यताम्।।

ओं वरलक्ष्मीदेवतायै नमः दिव्यपरिमलगन्धान् धारयामि इत्युक्त्वा गन्धं पुष्पेण आदाय कलशे पटे विकीर्यम्

हरिद्राचूर्णम् कुङ्कुम, अक्षताः -

श्लो -

ओं अक्षतान् धवलान् देवि! शालीयांस्तण्डुलान् शुभान्।
हरिद्राकुङ्कुमोपेतान् गृह्यतामब्धिपुत्रिके।।

ओं वरलक्ष्मीदेवतायै नमः, अक्षतान् हरिद्राचूर्णं कुङ्कुमं समर्पयामि।

इत्युक्त्वा अक्षतान् हरिद्राकुङ्कुमं मातुः समर्पणीयानि।

पुष्पसमर्पणम् -

श्लो -

ओं मल्लिकाजातिकुसुमैः चम्पकैर्वकुलैरपि।
शतपत्रैश्च कल्हारैः पूजयामि हरिप्रिये।।

ओं वरलक्ष्मीदेवतायै नमः नानाविद परिमलपत्रपुष्पाणि समर्पयामि इत्युक्त्वा पुष्पाणि कलशे पटे विकीर्य नमः कर्तव्यम्।

श्रीवरलक्ष्मीदेव्यै अङ्गपूजा निर्वाहणीया

(मातरं पादावारभ्य शिरः पर्यन्तं पुष्पैः पूजनीयम्)

ओं श्री चञ्चलायै नमः पादौ पूजयामि (पादयोः)
ओं श्री चपलायै नमः जानुनी पूजयामि (जानुनी)
ओं श्री पीताम्बरायै नमः ऊरुपूजयामि (ऊर्वोः)
ओं श्री कमलवासिल्यै नमः कटिपूजयामि (कटि)
ओं श्री पद्मालयायै नमः नाभिं पूजयामि (नाभिः)
ओं श्री मदनमात्रे नमः स्तनै पूजयामि (स्तनौ)
ओं श्री ललितायै नमः भुजद्वयं पूजयामि (भुजौ)
ओं श्री कम्बुकण्ठयै नमः कण्ठं पूजयामि (कण्ठः)
ओं श्री सुमुखायै नमः मुखं पूजयामि (मुखम्)
ओं श्री श्रियै नमः ओष्ठौ पूजयामि (ओष्ठौ)
ओं श्रीसुनासिकायै नमः नासिकं पूजयामि(नासिका)
ओं श्री रमायै नमः, कर्णे पूजयामि (कर्णे)
ओं श्री कमलायै नमः शिरः पूजयामि (शिरे)
ओं श्रीवरलक्ष्मीदेव्यै नमः सर्वाण्यङ्गानि पूजयामि।

(पश्चात् श्रीलक्ष्मी - अष्टोत्तरशतनामावल्या वा पुष्पैर्वा पूजनीया)

गमनिकः -अष्टोत्तरशतनामावळिं स्तोत्र ग्रन्थः गूगुल् द्वारा वा प्राप्नुवन्तु।

धूपम् -

श्लो - ओं दशाङ्गगुग्गुलूपेतं सुगन्धं च मनोहरम् ।
धूपं दास्यामि देवेशि। कृपया परिगृह्यताम्।।

ओं श्री वरलक्ष्मीदेवतायै नमः दिव्यपरिमल धूपमाघ्रापयामि।

इत्युक्त्वा घण्टां वादयन् मातुः धूपं त्रिवारं भ्रामणीयम्। दीपं घृते अर्दीकृत वर्तिकात्रयं ज्वालनीयम्।

श्लो।। ओं धृताक्तवर्तिसंयुक्तं अन्धकारविनाशकं
दीपं दास्यामि ते देवि गृहाण मुदिताभव।

ओं श्री वरलक्ष्मीदेवतायै नमः दीपं दर्शयामि इत्युक्त्वा घण्टां वादयन् दीपं पादसमीपे निक्षिप्य शिरः पर्यन्तं वारत्रयं दर्शनीयम्।

धूपदीपानन्तरं आचमनीयं समर्पयामि (इत्युक्त्वा कलशस्थजलं उद्धरिण्या एकवारं आदाय मातुः मुखपुरतः दर्शयित्वा अर्थ्यपात्रे निवेशनीयम्।

नैवेद्यम् (नैवेद्याय नारिकेलफलं फलानिसगुड''पोङ्गलि'' ''पुलिहोर'' मधुपदार्थाः इत्यादयः वर्तितव्याः। ''नैवेद्य पदार्थेषु अग्निवम्लेच्छा पलाण्डवः नोपयोज्याः'' (ज्ञातव्यम्) नैवेद्यपदार्थेषु कलशजलं पुष्पेण वा तुलसीपत्रेण विकीर्यम्।

नैवेद्यमन्त्रः -

श्लो - ओं नैवेद्यं षड्रसोपेतं दधिमधु आज्यसंयुतम्।
नानाभक्ष्यफलोपेतं गृहाण हरिवल्लभे।।

ओं श्रीवरलक्ष्मीदेवतायै नमः नारिकेलफल खण्डद्वयं, नानाविधफल भक्ष्यसहित महानैवेद्यं समर्पयामि (इत्युक्त्वा दक्षिणहस्तेन एकं पुष्पं धृत्वा) ओं प्राणात्मने नमः, ओं अपानात्मने नमः, ओं व्यानात्मने नमः, ओं उदानात्मने नमः, ओं समाननात्मने नमः (इत्युक्त्वा पञ्चवारं कलशजलं उद्धरिण्या आदाय मातुः दर्शयित्वा अर्घ्यपात्रे निवेशनीयम्।

पश्चात् मध्ये मध्ये पानीयं समर्पयामि (इत्युक्त्वा वारत्रयं मातुः उद्धरिण्या जलं दर्शयित्वा अर्घ्यपात्रे निवेशनीयम् पश्चात्) हस्तौ प्रक्षालयामि पादौ प्रक्षालयामि शुद्धाचमनीयं समर्पयामि इति पञ्चवारं उद्धरिण्या जलं दर्शयित्वा अर्घ्यपात्रे निवेशनीयम्।

ताम्बूलम् -

पत्रत्रयं द्वे पूगीफलानि द्वेपत्रे त्रयं पूगीफलं वा ताम्बूले निवेशनीयानि, यथाशक्ति दक्षिणा निवेशितव्या। अखण्डपत्राणि अखण्ड पूगीफलानि निवेशनीयानि।

श्लो ।।
ओं पूगीफलसमायुक्तं नागवल्लीदलैर्युतम्।
कर्पूरचूर्ण संयुक्तं ताम्बूलं प्रतिगृह्यताम्।।

ओं श्रीवरलक्ष्मीदेवतायै नमः सदक्षिणताम्बूलं समर्पयामि (इत्युक्त्वा उद्धरिण्या जलं ताम्बूले संपृष्टं कृत्वा मातुः वदनस्य दर्शयित्वा पश्चात् तज्जलं अर्घ्यपात्रे निवेशनीयम्)

कर्पूरनीराजनम् -

श्लो -
ओं नीराजनं समानीतं कर्पूररेणसमन्वितम् ।
तुभ्यं दास्यामि अहं देवि! गृह्यतां विष्णुवल्लभे।।

ओं श्रीवरलक्ष्मीदेवतायै नमः कर्पूरनीराजनं दर्शयामि। (इत्युक्त्वा मातुः पादावारभ्य शिरःपर्यन्तं वारत्रयं शनैः कर्पूरज्वालदारार्तिकं भ्रामणीयम्। अस्यां कान्तौ भक्तैः मातृदर्शनं कर्तव्यम्। नीराजनानन्तरं आचमनीयम् समर्पणीयम्। इत्युक्त्वा उद्धरीणी जलं मातुः दर्शयित्वा अर्घ्यं निवेशनीयम्।

वरलक्ष्मीदेवतायै नमः मन्त्रपुष्पं समर्पयामि (इत्युक्त्वा हस्तस्थाक्षतान् पुष्पाणि मातुः कलश समीपे निक्षिप्य नमः कर्तव्यम्।

मन्त्रपुष्पम् - हस्ते पुष्पाणि अक्षताः निवेशनीयाः

श्लो।।
ओं पद्मासने पद्मकरे सर्वलोकैकपूजिते।
नारायण प्रिये देवि! सुप्रीता भव सर्वदा ।।

वरलक्ष्मीदेवतायै नमः मन्त्रपुष्पं समर्पयामि (इत्युक्त्वा हस्त स्थाक्षतान् पुष्पाणि मातुः कलशसमीपे निक्षिप्य नमः कर्तव्यम्।

प्रदक्षिणम् - (पुष्पाणि अक्षतान् च स्वीकृत्य नमस्कारं कुर्वन् मातुः पृष्ट भागं अदर्शयित्वा - पार्श्वेस्थित्वा वारत्रयं प्रदक्षिणं कर्तव्यम्। पश्चात् मातुः पुरतः स्थित्वा पुष्पाणि अक्षतान् मातुः कलशसमीपे निक्षिप्य नमस्कारः कर्तव्यः।

श्लो।।
यानि कानि च पापानि जन्मान्तरकृतानि च।
तानि तानि प्रणश्यन्ति प्रदक्षिण पदेपदे।।

श्लो।।
अन्यथा शरणं नास्ति त्वमेव शरणं मम।
तस्मात् कारुण्यभावेन रक्ष रक्ष हरिप्रिये!

ओं वरलक्ष्मीदेवतायै नमः। आत्मप्रदिक्षणनि समर्पयामि।

नमस्काराः (मातुः वारत्रयं नमस्कर्तव्यम्

श्लो।।
ओं नमस्त्रैलोक्यजननि नमस्ते विष्णुवल्लभे।
पाहि मां भक्तवरदे! वरलक्ष्मि! नमोस्तुते।।

ओं श्रीवरलक्ष्मीदेवतायै नमस्कारान् समर्पयामि। पश्चात् हस्तधृत तोरेभ्यः तौरस्य व्रतकारिणीभिः स्त्रीभ्यः अपि नववलययुतश्वेत सूत्रं निर्माय तस्य हरिद्रालेपनं कृत्वा नवस्थानेषु ..... नागवल्लीं अथावा पुष्पं संक्षिप्य गन्धयः कर्तव्याः। एवं एकैकस्य तोरस्य नवग्रन्थयः स्पष्टं दृश्यमानत्वेन बन्धनीयम्। एतत्तोरं एकस्मिन् ताम्बूले निक्षिप्य मातुः दक्षिणभागे) अर्थात् कलशस्य दक्षिण भागे एकस्मिन् स्थाले निक्षिप्य ग्रन्थिषु हरिद्राकुङ्कुमं निक्षिप्य अथोनामभिः पूजनीयम्

ओं कमलायै नमः प्रथमग्रन्थिं पूजयामि (प्रथमग्रन्तौ)

ओं श्रीरमायै नमः द्वितीयग्रन्थिं पूजयामि (द्वितीयग्रन्थौ)

ओं श्री लोकमात्रे नमः तृतीयग्रन्थिं पूजयामि (तृतीयग्रन्थौ)

ओं विश्वजनन्यैनमः चतुर्थग्रन्थिं पूजयामि (चतुर्थग्रन्थौ)

ओं श्रीमहालक्ष्म्यै नमः पञ्चमग्रन्थिंपूजायामि

ओं श्री क्षीराब्धितनयायै नमः षष्ठग्रन्थिं पूजयामि (षष्ठग्रन्थौ)

ओं श्री विश्वसाक्षिण्यैनमः सप्तमग्रन्थिं पूजयामि (सप्तमग्रन्थौ)

ओं चन्द्रसहोदर्यै नमः अष्टमग्रन्थिं पूजयामि (अष्टमग्रन्थौ)

ओं हरिवल्लभायै नमः नवमग्रन्थि पूजयामि (नवमग्रन्थौ)

ओं श्री वरलक्ष्मीदेवतायै नमः नवग्रन्थियुक्त तोरपूजां समर्पयामि (इत्युक्त्वा तोरेषु हरिद्राकुङ्कुमं निक्षिप्य पुष्पाणि निक्षिप्य नमः कर्तव्यम्। अधःस्थमन्त्रं उच्चरन् आदौ मातुः दक्षिणहस्तस्य बद्ध्वा मातुः हरिद्राकुङ्कुमाः निवेश्य नमस्कर्तव्यम्।

श्लो।।

ओं बध्नामि दक्षिणे हस्ते नवसूत्रं शुभप्रदम्।
पुत्रपौत्राभिवृद्धिश्च सौभाग्यं देहिमे रमे।।

ओं वरलक्ष्मी देवतायै नमः - श्रीवरलक्ष्मी व्रताङ्गनवग्रन्थितोरं समर्पयामि (इत्युक्त्वा मातुः दक्षिणहस्तस्य तोरं बन्धनीयम्। (पश्चात्) वरलक्ष्मीव्रतचरणस्त्रियः इयमेव मन्त्रं उच्चरन्त्यः दक्षिणहस्ते नारिकेल फलं वा फलानि वा धृत्वा अन्यसुमङ्गलीस्त्रिया तोरं दक्षिणहस्तस्य बन्धनीयम्। मन्त्रं ''बध्नामि..... रमे'' तोरबन्धनानन्तरं मातुः हरिद्रा कुङ्कुमं समर्प्य नमः कर्तव्यम्।

ध्येयम् - एव तोरबन्धनानन्तरं पुरोहितस्य वायनं देयम्। वायने ताम्बूलं दक्षिणा मधुरपदार्थाः १२ निवेश्य फलानि च द्वादश समर्पणीयानि। अधो मन्त्रं वायनदानदम्पतीभिः वक्तव्यम्, पुरोहितेनापि वक्तव्यम्।

श्लो।।

ओं इन्द्रिरा प्रतिगृह्णातु इन्द्रिरा वै ददाति च । या इन्द्रिरा तारिकोभयोः इन्द्रिरायै नमो नमः।।

(एवं वदन् वायनं दम्पत्या पुरोहितेन च धर्तव्यम्। दम्पत्या देयम्। पुरोहितेन स्वीकर्तव्यम् । तदनन्तरं वायनदातृ दम्पतीः प्रति आशीर्वादः देयः। श्रीवरलक्ष्मीकृपाकटाक्षेण अनयोः दम्पत्योः दीर्घसौमङ्गल्य आयुरारोग्य ऐश्वर्याबिवृद्धिरस्तु। सततं श्रीरस्तु वंशाभिवृद्धिरस्तु। इत्युक्त्वा (पश्चात् पूजाचरणदम्पतीहस्तस्य पुष्पाणि अक्षतान् दत्वा अधःस्थ श्लोकं वदन् तानि पुष्पाणि अक्षतांश्च विद्यमानदक्षिण हस्ते उद्धरिणीत्रयं जलं निक्षिप्य मातुः पुरतः त्याज्यम्।

श्लो।।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं हरिप्रिये।
यत्पूजितं मया देवि! परिपूर्णं तदस्तु ते ।।

एतत्पूजाफलं सर्वं श्री वरलक्ष्मीदेवतार्पणमस्तु

अनया कल्पोक्तप्रकरेण कृतया षोडशोपचारपूजया भगवती सर्वात्मिका श्रीवरलक्ष्मीदेवता सुप्रीता सुप्रसन्ना वरदा भवतु। मम इष्टकाम्यार्थसिद्धिरस्तु (इत्युक्त्वा अक्षतान् जलञ्च मातुः कलश पुरतः स्थाले निक्षिप्य दम्पत्या नमः कर्तव्यम्। पश्चात् वरलक्ष्मीव्रतकथा पठनीया। व्रतकथारम्भात् पूर्वं सर्वेभ्यः पुष्पाणि अक्षतान् दत्वा कथा समाप्तिपर्यन्तं तथैव स्थित्वा भक्त्या कथा श्रोतव्येति वक्तव्यम्।

वरलक्ष्मीव्रतकथा -

श्लो।।

ओं सरस्वति नभस्तुभ्यं वरदे कामरूपिणी।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा।।

श्लो।।

ओं गुरुर्ब्रह्मा गुरुविष्णुः गुरुर्देवो महेश्वरः।
गुरुस्साक्षात् परब्रह्म तस्मै श्री गुरवे नमः।।

इमां वरलक्ष्मीकथां शिवः पार्वत्यै उवाच भक्ताः श्रुण्वन्तु। कदाचित् कैलासपर्वते परमशिवः पार्वती च रत्नसिंहासने उपविशतः बहवः महर्षयः तत्र सन्ति। लोकशुभकारी शिवः। पार्वती शिवं दृष्ट्वा नाथ! सकललोकनाथः सर्वप्राणिदयायुतः त्वं स्वामिन्। रहस्यशुभव्रतं वदन्तु। इति सर्वशुभकामिनी भर्तारमपृच्छत्। तदा शिवः पार्वत्याः आशयं ज्ञात्वा सर्वव्रतानां वरलक्ष्मीव्रतमुत्तमम्। एतदाचरणात् सर्वसम्पत्प्राप्तिः स्यात् झटिति सत्सन्तानफलं सिद्ध्यति। एतत्पवित्रव्रतं श्रावणमासे पूर्णिमायाः पूर्वागतशुक्रवासरे आचरणीयम्। एतद्व्रताचारणस्त्रीः महत्पुण्यं प्राप्स्यति। तदा पार्वती एतद्व्रतम् कथमाचरणीयम्। अस्मिन्नव्रते का देवता उपास्या। वरलक्ष्मीदेवी इतः पूर्वं कैः आराधिता। तत्कृपापात्राः के इत्यपृच्छत्।

तदा शिवः पार्वतीमुद्दिश्य हे पार्वति। परमपवित्रवरलक्ष्मीव्रतप्रभावं वदामीति वक्तुमारेभे -- सकलसम्पन्निलयकुण्डिनपुरे चारुमती नाम्नी ब्राह्मणस्त्रीः आसीत्। सा पतिव्रता भर्तृसेवां श्वश्रूश्वसुरसेवां सम्यगाचरति स्म। सर्वगृहकार्याणि स्वयमेवाचरतिस्म। विद्यावती सा नित्यमन्दहासमुखी मधुरभाषिणी सन्मनोभावविशिष्टा आसीत्।

तस्याः चारुमतीदेव्याः स्वप्ने लक्ष्मीप्रत्यक्षीभूय हे सौभाग्यवति! अत्र आगच्छ तव शुभं भविष्यति। वरलक्ष्मीदेवी आगता। श्रावणमासे पौर्णम्याः पूर्वं आगतशुक्रवारे मां पूजय। तव अभीष्टवराणि दास्यामीत्यनुजग्राह। तदा चारुमती महानन्देन मातः! त्वं पुण्यस्वरूपिणी। शरणार्थरक्षकी। त्रिलोकेषु सर्वपूज्या विष्णोः वक्षःस्थले विद्यमाना। त्वं यं दयया पश्यसि सः पुण्यात्मा, धनवान् गुणवान्। मातः! बहुजन्मपुण्यफलादेव त्वत्पादपद्मदर्शनं लभ्यते इति लक्ष्मीं अस्तौषीत्। तुष्टा लक्ष्मीः चारुमत्यै बहूनि वराणि दत्वा आशीः प्रयुज्य जगाम। चारुमतिः स्वप्नानन्तरं प्रातः उत्थाय स्वस्वप्नसङ्गतिं बन्धुभ्यः निवेदयामास। सर्वाः चारुमति! तव स्वप्नः शुभङ्करः समीचीनः। सर्वाः वयं लक्ष्मीदेव्युक्तव्रतमाचरिष्यामः इति निर्णीय श्रावणपौर्णम्यर्थं निरीक्षितवत्यः। अदृष्टवशात् वरलक्ष्मीव्रतदिनमागतम्। सर्वाः स्त्रियः निर्मलमनसा शिरः स्नानं कृत्वा शुभवस्त्रधारणं चक्रुः। एकस्मिन् कलशे तण्डुलानि वटपत्रखण्डान् हरिद्राकुङ्कुमाः कलशे निवेश्य तस्मिन् कलशे वरलक्ष्मीदेवीमावाहयित्वा चारुमत्यादयः पूजाश्चक्रुः। दक्षिणहस्तस्य नवग्रन्थियुततोरबन्धनं चक्रुः। घृतपिष्टपाकान् मधुरपदार्थान् मातुः नैवेद्यत्वेन ददुः। सन्निष्ठापुरोहितस्य द्वादश भक्ष्यानि फलानि नारिकेलं ताम्बूलञ्च दक्षिणात्वेन वायनं ददुः। मातुः सन्निधौ मातुः समर्पितनैवेद्यपदार्थान् भक्त्या देवीप्रसादत्वेन स्वीचक्रुः।

पश्चात् वरलक्ष्मीदेवीप्रभावात् चारुमत्यादिमहिलाः मौक्तिकमणिहारान् नूपुराणि अमूल्याभरणानि प्रापुः। एतत्सम्पद्भिः सह पुत्रपौत्रान् प्राप्य धन धान्य समृद्धाः अभूवन्। दानधर्मादीनाचरन्तः बन्धूनपि पोषयन्त्यः सानन्दं जीवनं यापयामासुः।

पार्वति! चारुमतीदेवीद्वारा श्रुतं वरलक्ष्मीव्रतं नगरस्थाः सर्वाः महिलाः ज्ञात्वा भक्तिश्रद्धाभ्यां व्रतमिदं आचचरुः। चारुमतीतः वयं धन्याः अभवाम। भोगभाग्यैः सानन्दं वसामः। चारुमतिः महापुण्यवती। अदृष्टवती साक्षात् वरलक्ष्मीदेवी एव प्रत्यक्षीभूय व्रतमिदमुपदिदेशेति तां सर्वाः प्राशशंसु। पार्वति! तदारभ्य व्रतमिदं वरलक्ष्मीव्रतमिति प्रसिद्धिमवाप। सर्वोत्तमं व्रतमिदं सविवरं तव अकथयम्। व्रतमिदं ये आचरेयुः, व्रतकथामिमां ये श्रोष्यान्ति, कथामिमां ये श्रावयन्ति ते वरलक्ष्मीकृपया सर्वकार्यसिद्धिं प्राप्नुयुः इति शिवः प्रोवाच।

भविष्योत्तरपुराणे पार्वतीपरमेश्वर संवादस्थ
वरलक्ष्मीव्रतं सम्पूर्णम्।

सर्वेजनास्सुखिनो भवन्तु। समस्त सन्मङ्गालानि भवन्तु।

अक्षतान् पुष्पाणि मातुः कलश समीपे निवेश्य नमः कर्तव्यम्। ततः तीर्थप्रसादाः देयाः।

तीर्थमन्त्रः -

अकालमृत्युहरणं सर्वव्याधिनिवारकम्।
समस्तपापशमनं लक्ष्मीपादोदकं शुभम्।

- शुभमस्तु -



- कुमारी लिङ्गारेड्डि उमामहेश्वरी
चरवाणी - ९१८२०७५७६१

सर्वैः ज्ञायते यत् अखिलाण्डकोटिब्रह्माण्डनायकस्य श्रीश्रीनिवासस्य सन्निधौ वैखानससम्प्रदायानुरोधेनैव अर्चनोत्सवादयः वैभवेन प्रचलन्तीति।

विखनोमुनिः तावत् सृष्ट्यारम्भे श्रीमन्नारायणस्य हृदयपुटात् मनसा शुभेऽस्मिन् दिवसे

श्रवणे श्रावणे शुक्लपूर्णिमासोमवासरे।
सिंहलग्ने च संयुक्ते च भजे नैमिशमागतम्।।

श्रावणमासे शुक्लपूर्णिमातिथौ सिंहलग्ने आविर्भूतो वर्तते। सचासौ चतुर्मुखब्रह्मनाम्ना प्रसिद्धः यः अस्ति स एव भवति। श्रीमन्नारायणद्वारा खननेन चिन्तनेन च वैदिक अर्चनाक्रियानिर्वहणतत्परस्सन् सञ्जातो वर्तते। विशेषखननेन आविर्भावकारणात् विखना इति स च प्रसिद्धः।

नारायणपरायणो निर्द्वद्वो मुनिः इति सूत्रवाक्याधारेण मुनिलक्षणसम्पन्नः भवेत्। अनेन श्रीविखनोमुनिना उपरिष्टसूत्रवाक्यलक्षणं सर्वं तस्यैव सुसंपन्नं भवेत्। कल्पसूत्रमिदं श्रौत-स्मार्त धर्म प्रवर इति चतुर्भिः विभागैः द्वात्रिंशत्प्रश्नात्मकैः सूत्रसहितैश्च अनुगृहीतवान्।

तस्मिन् कल्पसूत्रे यानि प्रधानसूत्राणि सन्ति तानि तावत्

अथाग्नौ नित्यहोमान्ते विष्णोः नित्यार्चा सर्वदेवार्चा भवति अग्निर्वैदेवानाम विष्णुः परमः तदन्तरेण सर्वाः अन्यादेवताः इति ब्राह्मणम्।

तस्मात् गृहे परमं विष्णुं प्रतिष्ठाप्य सायं प्रातर्होमान्ते अर्चयन्ति।

- - - - - - -

- - - - - - -

यज्ञेषु विहीनं तत् संपूर्णं भवतीति श्रुतिः।
द्विजातिरतन्द्रितो नित्यं गृहे देवायतने वा
आकृत्या भगवन्तं नारायणमर्चयेत्।
तद्विष्णोः परमं पदं गच्छतीति विज्ञायते।।

- श्रीवैखानसगृह्यसूत्रम् ४ खण्डः

एतानि सूत्रवाक्यानि मनसि निधाय भृगु-अत्रिमरीचि-कश्यपाः ऋषयः अधिकार - तन्त्र - संहिता काण्डनामभिः ग्रन्थान् विरच्य वैखानसवाङ्मयसर्वस्वं सम्पूणं कृतवन्तोऽभवन्।

वैखानसागमग्रन्थाः -

वैखानसवाङ्मये वैखानसकल्पसूत्रं, आनन्दसंहिता, विमानार्चनाकल्पः, क्रियाधिकारः, खिलाधिकारः, यज्ञाधिकारः, वासाधिकारः, प्रकीर्णाधिकारः, ज्ञानकाण्डः, समूर्त्यर्चनाधिकरणम् इत्येते प्रधानग्रन्थाः इतरे च व्याख्या - विवरण - भाष्य - सिद्धान्तानुवादग्रन्थाः त्रिंशदधिकाः मुद्रिताः उपलब्धाः सन्ति अद्य वैखानसवाङ्मये।

वैखानसतत्त्वम् -

ज्ञान-योग-चरित-क्रिया इति प्रधानाः चत्वारः मार्गाः सन्ति वैखानसवाङ्मये। आस्तिकः अर्चकः आगमज्ञः प्रथमं चरितमार्गद्वारा शरीरं सुसंस्कृत्य योगमार्गद्वारा वायुजयं संपाद्य तत्त्वमार्गद्वारा मनसः परिशुद्धिं प्राप्य क्रियामार्गद्वारा अर्चनां कर्तुं अर्हतां संपादयति।

अयं वैदिकमार्गः भगवत्तत्त्वं निष्कल-सफलविभागं वैकुण्ठलोकवर्णनं लक्ष्मीतत्त्व - अर्चिरादिमार्गः संसरणहेतुः जप-होम-अर्चन-ध्यानमार्गाः सगुणात् निर्गुणरूपसाधनं लक्ष्मीसहितविष्णुदेवः ध्येयः ज्ञेयः प्राप्यः इति वैखानसतत्त्वं विशिष्टतया विलक्षणतया च उपदिशति।

दैवमचिन्त्यं बलवत् बलवान्ननु पुरुषकारोऽपि।

वैखानसागमवैशिष्ट्यम् -

चतुर्वेदमन्त्रैः विनियोगरूपः मुद्रा बीजाक्षर पञ्चसंस्कारसरितः वैदिकः शब्दप्रमाणमात्रः विप्लवस्य अनवकाशरूपः श्रौतकियासदृशः पञ्चबेरपञ्चाग्निकुण्डकल्पन पञ्चव्यूहसिद्धान्तसहितः, अतोदेवादि वैष्णवविष्णुसूक्त यद्देवादि सार्वदैविकपारमात्मिकहींकारादिमन्त्रसर्वस्वः वंशपारंपर्यसमागतः वेदार्थसारभूतः वैखानसागमः भवतीति निष्कर्षः।

वैखानससम्बद्धाः आलयाः -

तिरुमल श्रीवेङ्कटेश्वरस्वामिदिव्यालयादारभ्य मङ्गलगिरि द्वारकातिरुमल -तिरुपति कार्वेटिनगर - नारायणवनं - नागुलापुरं - श्रीनिवासमङ्गापुरं - तंजयामणि तिरुनय्यूरु श्रीरामविष्णवागरं गोष्ठीपुरं मैसुर् बेङ्गलूर, कन्याकुमारी भुवनेश्वर् त्रोताद्रि तिरुवहिन्द्रपुर -तिरुवलिक्केणि तिरुनीर्यलै - अमेरिकादिदेशेष्वपि नैकानि मन्दिराणि विद्यन्ते वैखानससंबद्धदिव्यानि। अद्य वैखानसविद्वांसः अपि नैके विराजन्ते।

उपसंहारः -

श्रीमन्नारायणस्य हृदयपुटात् मनसः आविर्भूत श्रीविखनोमुनिद्वारा समाराब्धः भृग्वादिभिः प्रसारितः शब्दप्रमाणसहितः असौ वैखानसागमः ग्रामदिपट्टणपर्यन्तं विद्यमानेषु नैकेषु मन्दिरेषु राराजमानस्सन् लब्धप्रतिष्ठो राराजतेइति सार्वजनीनोऽयमंशः।

सर्वेऽपि आस्तिकाः आर्चकाः आचार्याः गवेषकाः वैखानसवाङ्न्याधिकृतज्ञानं संपाद्य कृतार्थाः ज्ञानिनः भगवदनुग्रहतत्पराः भवन्तु इति आशास्य विरमामि।

''वैखानसार्यदिव्याज्ञा वर्धतामभिवर्धताम्।''

(८ पुटतः)

कश्यपमहर्षि वर्षतिरुनक्षत्रम्

कश्यपाद्दितेः मरुद्गणोत्पत्तिः - इन्द्रः दितिपुत्रान् बाधतेस्म। तदा दितिः इन्द्रबलसमानपुत्रप्राप्तये भर्तुशुश्रषाञ्चकार। कश्यपाङ्गीकारात् दितिः गर्भिणी जाता। इन्द्रः दितिं स्वसेवांकर्तुमाज्ञापयामास। दितिः अङ्गीचकार। कदाचित् दितिः अशुचिर्भूत्वा निद्रातिस्म। तत्समये इन्द्रः गर्भस्थशिशुं सप्तखण्डान्चकार। जाताः सप्तशिशवः रुदन्ति स्म। तदा तानपि सप्तखण्डान् इन्द्रश्चकार। दितिः निद्रातः उत्थाय विषयं ज्ञात्वा जाताः पुत्राः मित्राण्येव भवेयुरिति कथनात् अनुगृह्य इन्द्रः तानहत्वा जगाम। एवं नवाधिकचत्वारिंशद्भूत्वा मरुद्गणनाम्ना प्रसिद्धिमवापुः।

कश्यपस्य ज्ञानबोधः - कश्यपस्य भार्यासु दितिदनू स्वपुत्राः ''देवताभिः हताः'' इति रुदतः स्म। कश्यपः विषयं ज्ञात्वा तयोः पुराकृतकर्मफलमवश्यमनुभोक्तव्यम् इति बोधयित्वा तव पुत्राः शमदमदयाधर्मरहिताः अत एव तेनष्टाः। दुःखंत्यजतम्। दुःखं सत्यधर्मौनाशयति। धर्मक्षयात् पुण्यक्षयः। पुण्यक्षीणतया सर्वदुःखप्राप्तिः। अत एव ऋषयः दुःखनिवारणाय घोरं तपः आचरन्ति। नित्यनिर्विकारनिर्गुणपरमात्मनि मायाशक्तिवशात् पञ्चतन्मात्रपञ्चभूतानि, तद्द्वारा लोकाः, स्थूलशरीरादयः जायन्ते। ज्ञानेन्द्रियप्राणपञ्चकं मनोबुद्धयः जायन्ते। लिङ्गसूक्ष्मकारणशरीरैः ऐक्यभ्रान्तिं प्राप्य परमात्मा जीवोभूत्वा कर्मफलभोक्ता भवति। जाग्रत्स्वप्नसुषुप्त्यवस्थाभिमानीभूत्वा जीवः विश्वः तैजसः, प्राज्ञः भवति। शरीरमेवाहमितिभ्रान्तिं दूरीकृत्य जीवः गुरूपदिष्टिमहावाक्यात् अपरोक्षज्ञानं प्राप्य पुनरावृत्तिरहितमोक्षं प्राप्नोति। सत्यधर्मस्वरूपं विष्णुंसेवित्वा तत्कीर्तनस्मरणपूजावन्दनैः जीवत्वभावं परित्यज्य परमात्मतादात्म्यं जीवः प्राप्स्यति। एवं दितिदनुभार्याभ्यां बोधयित्वा ज्ञानसुखं दत्वा कश्यपः तपसे जगाम।

कश्यपस्मृति : - कश्यपधर्मसूत्रनाम्ना धर्मशास्त्रं वर्तते। अविवाहितस्त्रीः प्रियगृहे विद्यमानापि भार्या न भवतीति पितृकार्ये भागस्वीकरणाय अनर्हेति कश्यपोक्तं बोधायनोऽपि अङ्गीचकार। विश्वरूपहरदत्तादिभिः कश्यपस्मृतिः उदाह्रियते। कश्यपोक्तक्षमागुणप्रशंसैव कश्यपगीतेति कथ्यते। वेदयज्ञशौच सत्यविद्याधर्मसचराचरजगत् सर्वेषु लोकेषु क्षमायां वर्तते। तपःस्वध्याययज्ञकर्तुब्रह्मविद्भिः प्राप्यमाणपुण्यगतयः क्षमावद्भिः प्राप्यन्ते।

कश्यपगीता : - क्षमाधर्मः ..... क्षमाशमः इति पञ्चश्लोकात्मककश्यपगीतापि वर्तते।।

चित्रकथा

शत्रुभिः स्नेहः आवश्यकतामनुसृत्य परिमिततया भाव्या

तेलुगुमूलम् - 'कलारत्न' डा.कम्पेल्ल रविचन्द्रन्
चित्राणि - श्री तुम्बलि शिवाजी
संस्कृतानुवादः - डा.के .सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०








हे मूषिक! आवां द्वौ सखायौ। आपदि परस्परं साहाय्येन रक्षितौ। द्वावपि मिलित्वा सन्तोषेण कालं यापयिष्यतः। मां दृष्ट्वा न भेतव्यम्।
मूषिकः शीघ्रं रज्जून् भञ्जयामास। मार्जालः शीघ्रतया वृक्षस्योपरिस्थानं प्राप्तः।



मास्तु भीतिः। वागुरारज्जून् भञ्जयिष्यामि।


हे मार्जाल! मम वाक्यं श्रुणु। कः मित्रम्, कः शत्रुरिति कथनमसाध्यम् कदा कस्यमनः परिणमते इति कोऽपि न जानाति।


मूषिकः शीघ्रं रज्जून् भञ्जयामास। मार्जालः शीघ्रतया वृक्षस्योपरिस्थानं प्राप्तः।


हे मार्जाल! मम वाक्यं श्रुणु। कः मित्रम्, कः शत्रुरिति कथनमसाध्यम् कदा कस्यमनः परिणमते इति कोऽपि न जानाति।


मार्जाल! त्वत्तः अहं रक्षितः मत्साहाय्यात् त्वमपि वागुरातः रक्षितोऽसि। अवयोः स्नेहः एतावदेव। तव समीपमहं नागमिष्यामि। कुतश्चेदहं तव आहारः किल।


मार्जाल! त्वत्तः अहं रक्षितः मत्साहाय्यात् त्वमपि वागुरातः रक्षितोऽसि। अवयोः स्नेहः एतावदेव। तन समीपमहं नागमिष्यामि। कुतश्चेदहं तव आहारः किल।


मूषिककथनं सत्यमेव। सः मम आहारः। यस्मिन् समये यस्य बुद्धिः कथं परिवर्तते इति कोऽपि न जानाति।
नीतिः - अवसरे प्राप्ते शत्रोः सहाय्यं करणमुचितमेव। परन्तु शत्रुं पूर्णतया न विश्वसनीयम्।

आगस्ट् 2026 द्वादशराशीनां मासफलानि

- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९४९०७४१४१४





१.मेषराशिः - वैराग्यभावना, उद्योगपरिवर्तनम्, पराक्रमः, अधिकप्रयाणेच्छा, आध्यात्मिकचिन्तनं अधिकारजनद्वारा सर्वकार्येषु सत्फलानि च सम्भविष्यन्ति। श्रीमहाविष्णोः आराधनं कर्तव्यम्।



२.वृषभराशिः - यशः, सर्वत्रलाभः, शान्तस्वभावः, वैराग्यजीवनेच्छा, उद्योगव्यापारेषु जयः, अधिकारजनप्रशंसा, तीर्थयात्रालाभः, धनागमनं, सोदरलाभः, आनुकूल्यजीवनम् भूलाभः, सम्भविष्यन्ति। तदा तदा ज्वरपीडा सम्भविष्यति। लक्ष्मीपूजनं करणीयम्।



३. मिथुनराशिः - शरीरस्य अस्वास्थ्यं, उद्योगपरिवर्तनं, कुटुम्बलाभः, वाहनसौख्यं,अधिककोपः, धनागमनम्, अधिकारजनप्रशंसाः, यशः, तीर्थयात्राभिलाषः, मनोव्यथा सम्भविष्यन्ति। शिवाराधनं कर्तव्यम्।



४.कर्काटकराशि : - शान्तस्वभावः, उत्साहः, वृथाप्रयाणानि, तदा तदा भूविवादाः भ्रातृद्वारा नष्टं, ज्वरबाधा, शरीरस्य अस्वास्थ्यं सम्भविष्यन्त्यपि धनागमनं, कुटुम्बभिवृद्धिः, अध्यात्मिकचिन्तनं, शुभकार्येषु निमग्नता सम्भविष्यन्ति। शिवाराधनं करणीयम्।



५. सिंहराशिः - भू-गृह-वस्तु-वाहन-वस्त्र संपादनार्थं धनव्ययः, भूलाभः, सोदरलाभः, कुटुम्बाभिवृद्धिः, सम्भविष्यन्त्यपि कस्मिंश्चित् काले मनोव्यथा, इतस्ततः भ्रमणम्, विद्या-उद्योग व्यापारेषु परिवर्तनम् अधिकारजनबाधा च सम्भविष्यन्ति। श्रीमहाविष्णोः अर्चनं करणीयम्।



६. कन्याराशिः - शरीरसौन्दर्यं, बुद्धेः नैपुण्यं, विद्याव्यासङ्गेषु, लाभः, उद्योगजयः, आत्मोन्नतिः, धनलाभः, शत्रूद्वारा जयः, भूलाभः सम्भविष्यन्ति। तदा तदा मनोव्यथा दुःखं, आत्मन्यूनता, कार्यणां मन्दगमनं भविष्यन्ति। शिवाराधणं करणीयम्।



७. तुलाराशिः - भाग्यलाभः, वैराग्यं, स्त्रीजनद्वारानष्टम् मनोव्यथा, उद्योगपरिवर्तनम् व्यापारलाभः, आध्यात्मिक - लाभः, दुःस्वप्नाः, तीर्थयात्राः, आत्मोन्नतिः- आनन्दः, सर्वत्रजयलाभः भविष्यन्ति। शिरावाधनं करणीयम्।



८. वृश्चिकराशिः - अनूह्यभाग्यलाभः, वृथाविवादाः, तदा तदा ज्वरबाधा, विद्याव्यासङ्गेषु आनुकूल्यता, पितृद्वारा धनागमनं, दैवदर्शनं, पुण्यनदीस्नानम्, स्त्रीजनद्वारा यशः, मित्रलाभः, उद्योगपरिवर्तनं भविष्यन्ति। शिवाराधनं कर्तव्यम्।



९. धनूराशिः - उद्योगोन्नतिः पराक्रमः, आध्यात्मिकलाभः, तीर्थयात्रा, वाहनसौख्यम्, सोदरलाभः, दैवदर्शनं, अधिकारजनप्रशंसा भविष्यन्ति। तदा तदा शरीरस्य अस्वास्थ्यम्, ज्वरबाधा, अधिकधनव्ययः, व्यापारनष्टं भविष्यन्ति। नवग्रहाराधनं करणीयम्।



१०. मकरराशिः - सर्वत्रलाभः, अनूह्यधनलाभः, कुटुम्बोन्नतिः, स्त्रीजनद्वारा धनागमनम्, शुभकार्यपरंपराः, अपरिष्कृतकार्याणां परिष्कारः, तीर्थयात्रालाभः, दैवदर्शनं पुण्यकार्यश्रद्धा सम्भविष्यन्ति। तदा तदा वाक्पारुष्यं, आत्मन्यूनता च सम्भविष्यन्ति। सूर्यग्रहाराधनं कर्तव्यम्।



११. कुम्भराशिः - अधिकधनव्ययः, वैराग्यचिन्तनं, उद्वेगः, वृथादेशभ्रमणम्, कुटुम्बजनद्वारा निन्दारोपणम्, भविष्यन्त्यपि शुभकार्यार्थं धनव्ययः, दैवदर्शनम्, बन्धुसमागमः, अधिकारजनप्रशंसाः, व्यापार- उद्योगकार्येषु अधिकश्रमाः सम्भविष्यन्ति। नवग्रहाराधनं करणीयम्।



१२. मीनराशिः - सर्वत्रलाभः, आत्मसौन्दर्यम्, बुद्धिनैपुण्यं, सन्तानलाभः, सर्वकार्येषु दृढदीक्षा, आध्यात्मिकज्ञानसाधनेच्छा, धनागमनचिन्ता, विद्याव्यासङ्गेषु नैपुण्यम्, अधिकारजनप्रशंसाः सम्भविष्यन्ति। तदा तदा दुःस्वप्नाः, चिन्ता, वृथाविवादाः, दूरप्रयाणानि च सम्भविष्यन्ति। शिवाराधनं कर्तव्यम्।

अयं निजः परोवेति गणना लघुचेतसाम्।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D., P.G.Dip in JMC on behalf of Tirumala Tirupati Devasthanams and Printed and Published at Tirumala Tirupati Devasthanams Press, K.T. Road, Tirupati-517 507. Editor: Dr.V.G. Chokkalingam, M.A., Ph.D. P.G.Dip in JMC.



11.06.2026 तिथौ आन्ध्रप्रदेशराज्यपालः माननीयः श्री यस्.अब्दुल्नजीर् महाशयाः तिरुमलश्रीवेङ्कटेश्वरस्वामिदर्शनं प्राप्तवन्तः। अस्मिन्सन्दर्भे वेदपण्डितैः वेदाशीर्वचनं दत्तम्। अस्मिन्कार्यक्रमे ति.ति.देवस्थानकार्यनिर्वहणाधिकारी अनुबन्धकार्यनिर्वहणाधिकारी सि.वि. यस्. वो च, चित्रपटं राज्यपालाय समर्पितवन्तः। अन्यिमन् सन्दर्भे अन्ये अधिकारिणश्च भागं गृहीतवन्तः।



12.06.2026 तिथौ आन्ध्रप्रदेशराज्यस्य मुख्यन्यायाधिकारी जस्टिस् लीसागिल् महोदयाः तिरुमल श्रीवेङ्कटेश्वरस्वामिदर्शनं प्राप्तवन्तः। अस्मिन्सन्दर्भे वेदपण्डितैः वेदाशीर्वचनं दत्तम्। उन्नतन्यायाधिकारिणे ति.ति.देवस्थानकार्यनिर्वहणाधिकारी, अनुबन्धकार्यनिर्वहणाधिकारी, सि.वि.यस्.वो च चित्रपटं प्रदत्तवन्तः अस्मिन्कार्यक्रमे अन्ये अधिकारिणश्च भागं गृहीतवन्तः।















जून् 21 तिथौ अन्तर्राष्ट्रीययोगदिनं पुरस्कृत्य 07.06.2026 दिनादारभ्य 21.06.2026 पर्यन्तं तिरुमलतिरुपतिदेवस्थानेन योगानन्दनामकविविधयोगकार्यक्रमान् तिरुपतिनगरे विविधप्रान्तेषु वैभवोपेततया निर्वाहितदृश्यमालिका।

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY Published by Tirumala Tirupati Devasthanams Printing on 25-07-2026 & posting at Tirupati RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal Regd. No. TRP/154/2024-2026
"LICENCED TO POST WITHOUT PREPAYMENT No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.

